# sA Nkhyatattvakaumudl

# સાઙ્ખ્યતત્ત્વકૌમુદી

## Document Information

Text title : sAMkhyatattvakaumudI

File name : sAMkhyatattvakaumudI.itx

Category : major_works

Location : doc_z_misc_major_works

Transliterated by : Dhaval Patel drdhaval2785 at gmail.com

Proofread by : Dhaval Patel drdhaval2785 at gmail.com

Source : sAnkhyasaNgrahaH 1918

Latest update : September 15, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 5, 2024

*sanskritdocuments.org*

sA Nkhyatattvakaumudl

# સાઙ્ખ્યતત્ત્વકૌમુદી

ટત્ત્વકૌમુદિ વિથ્ સન્સ્કિત્ નોતેસ્ રજેશ્વર શસ્ત્રિ

કારિકા ૧

અજામેકાં લોહિતશુક્લકૃષ્ણાં
બહ્વીઃ પ્રજાઃ સૃજમાનાં નમામઃ ।
અજા યે તાં જુષમાણાં ભજન્તે
જહત્યેનાં ભુક્તભોગાં નુમસ્તાન્ ॥ ૧॥

કપિલાય મહામુનયે મુનયે શિષ્યાય તસ્ય ચાસુરયે ।
પઞ્ચશિખાય તથેશ્વરકૃષ્ણાયૈતે નમસ્યામઃ ॥ ૨॥

ઇહ ખલુ પ્રતિપિત્સિતમર્થં પ્રતિપાદયન્ પ્રતિપાદયિતાઽવધેયવચનો ભવતિ પ્રેક્ષાવતામ્ । અપ્રતિપિત્સિતમર્થં તુ પ્રતિપાદયન્ 'નાયં લૌકિકો નાપિ પરીક્ષકઃ' ઇતિ પ્રેક્ષાવદ્ભિરુન્મત્તવદુપેક્ષ્યેત । સ ચૈષાં પ્રતિપિત્સિતોઽર્થો, યો જ્ઞાતઃ સન્ પરમપુરુષાર્થાય કલ્પતે, ઇતિ પ્રારિપ્સિતશાસ્ત્રવિષયજ્ઞાનસ્ય પરમપુરુષાર્થસાધનહેતુત્વાત્ તદ્વિષયજિજ્ઞાસામવતારયતિ-

॥ દુઃખત્રયાભિઘાતાજ્જિજ્ઞાસા તદઘાતકે હેતૌ ।
દૃષ્ટે સાપાર્થા ચેત્ નૈકાન્તાત્યન્તતોઽભાવાત્ ॥ ૧॥

એવં હિ શાસ્ત્રવિષયો ન જિજ્ઞાસ્યેત યદિ દુઃખં નામ જગતિ ન સ્યાત્, સદ્વા ન જિહાસિતમ્, જિહાસિતં વા અશક્યસમુચ્છેદમ્ । અશક્યસમુચ્છેદતા ચ દ્વેધા- દુઃખસ્ય નિત્યત્વાત્, તદુચ્છેદોપાયાપરિજ્ઞાનાદ્વા । શક્યસમુચ્છેદત્વેઽપિ ચ શાસ્ત્રવિષયસ્ય જ્ઞાનસ્યાનુપાયભૂતત્વાદ્વા, સુકરસ્યોપાયાન્તરસ્ય સદ્ભાવાદ્વા ॥

તત્ર ન તાવદ્ દુઃખં નાસ્તિ, નાપ્યજિહાસિતમિત્યુક્તમ્- "દુઃખત્રયાભિઘાતાદ્" ઇતિ । દુઃખાનાં ત્રયં દુઃખત્રયમ્ । તત્ ખલુ આધ્યાત્મિકમ્, આધિભૌતિકમ્,

આધિદૈવિકઞ્ચ ।
તત્રાધ્યાત્મિકં દ્વિવિધમ્, શારીરં માનસં ચ । શારીરં વાતપિત્તશ્લેષ્મણાં
વૈષમ્યનિમિત્તમ્ ।
માનસં કામક્રોધલોભમોહભયેર્ષ્યાવિષાદવિષયવિશેષાદર્શનનિબન્ધનમ્ ।
સર્વઞ્ચૈતદાન્તરોપાયસાધ્યત્વાદાધ્યાત્મિકં દુઃખમ્ ।
બાહ્યોપાયસાધ્યં દુઃખં દ્વેધા, આધિભૌતિકમ્, આધિદૈવિકઞ્ચ ।
તત્રાધિભૌતિકં માનુષપશુસરીસૃપસ્થાવરનિમિત્તમ્, આધિદૈવિકં તુ -
યક્ષરાક્ષસવિનાયકગ્રહાદ્યાવેશનિબન્ધનમ્ ॥

તદેતત્ પ્રત્યાત્મવેદનીયં દુઃખં રજઃપરિણામભેદો ન
શક્યતે પ્રત્યાખ્યાતુમ્ । તદનેન દુઃખત્રયેણાન્તઃકરણવર્તિના
ચેતનાશક્તેઃ પ્રતિકૂલવેદનીયતયાઽભિસંબન્ધોઽભિઘાત ઇતિ । એતાવતા
પ્રતિકૂલવેદનીયત્વં જિહાસાહેતુરુક્તઃ । યદ્યપિ ન સન્નિરુધ્યતે દુઃખં,
તથાપિ તદભિભવઃ શક્યઃ કર્તુમિત્યુપરિષ્ટાદુપપાદયિષ્યતે ।
તસ્માદુપપન્નમ્ "તદપઘાતકે હેતૌ" ઇતિ । તસ્ય દુઃખત્રયસ્ય અપઘાતકઃ
તદપઘાતકઃ । ઉપસર્જનસ્યાપિ બુદ્ધ્યા સન્નિકૃષ્ટસ્ય તદા પરામર્શઃ ।
અપઘાતકશ્ચ હેતુઃ શાસ્ત્રપ્રતિપાદ્યો, નાન્ય ઇત્યાશયઃ ॥

અત્ર શઙ્કતે- "દૃષ્ટે સાઽપાર્થા ચેત્" ઇતિ।
અયમર્થઃ । અસ્તુ તર્હિ દુઃખત્રયં, જિહાસિતં ચ તદ્ ભવતુ, ભવતુ
ચ તચ્છક્યહાનં, સહતાં ચ શાસ્ત્રગમ્ય ઉપાયસ્તદુચ્છેત્તુમ્ ।
તથાપ્યત્ર પ્રેક્ષાવતાં જિજ્ઞાસા ન યુક્તા, દૃષ્ટસ્યૈવોપાયસ્ય
તદુચ્છેદકસ્ય સુકરસ્ય વિદ્યમાનત્વાત્, તચ્છક્યહાનમ્, સહતાં ચ
શાસ્ત્રગમ્ય ઉપાયસ્તદુચ્છેત્તુમ્ । તથાઽપ્યત્ર પ્રેક્ષાવતાં જિજ્ઞાસા ન
યુક્તા, દૃષ્ટસ્યૈવોપાયસ્ય તદુચ્છેદકસ્ય સુકરસ્ય વિદ્યમાનત્વાત્ ।
તત્ત્વજ્ઞાનસ્ય તુ અનેકજન્માભ્યાસપરમ્પરાઽઽયાસસાધ્યતયાઽતિદુષ્કરત્વાત્
।
તથા ચ લૌકિકાનામાભાણકઃ-
'અક્કે ચેન્મધુ વિન્દેત કિમર્થં પર્વતં વ્રજેત્ ॥

ઇષ્ટસ્યાર્થસ્ય સંસિદ્ધૌ કિ વિદ્વાન્ યત્નમાચરેત્' ॥ ઇતિ ।
સન્તિ ચોપાયાઃ શતશઃ શારીરદુઃખપ્રતીકારાયેષત્કરા
ભિષજાં વરૈરુપદિષ્ટાઃ । માનસસ્યાપિ સન્તાપસ્ય પ્રતીકારાય
મનોજ્ઞસ્ત્રીપાનભોજનવિલેપનવસ્ત્રાલઙ્કારાદિવિષયસમ્પ્રાપ્તિરુપાયઃ

સુકરઃ । એવમાધિભૌતિકસ્યાપિ દુઃખસ્ય
નીતિશાસ્ત્રાભ્યાસકુશલતાનિરત્યયસ્થાનાધ્યાસનાદિઃ પ્રતીકારહેતુરીષત્કરઃ ।
તથાઽધિદૈવિકસ્યાપિ મણિમન્ત્રૌષધાદ્યુપયોગઃ સુકરઃ પ્રતીકારોપાય ઇતિ ॥

નિરાકરોતિ- "ન" ઇતિ । કુતઃ ? "એકાન્તાત્યન્તતોઽભાવાત્" । એકાન્તો -
દુઃખનિવૃત્તેરવશ્યમ્ભાવઃ, અત્યન્તો - નિવૃત્તસ્ય દુઃખસ્ય
પુનરુત્પાદઃ, તયોરેકાન્તાત્યન્તયોરભાવ એકાન્તાત્યન્તતોઽભાવઃ ।
ષષ્ઠીસ્થાને સાર્વવિભક્તિકસ્તસિઃ ।
એતદુક્તં ભવતિ યથાવિધિ
રસાયનાદિકામિનીનીતિશાસ્ત્રાભ્યાસમન્ત્રાદ્યુપયોગેઽપિ તસ્ય
તસ્યાધ્યાત્મિકાદેર્દુઃખસ્ય નિવૃત્તેરદર્શનાદ્ અનૈકાન્તિકત્વમ્,
નિવૃત્તસ્યાપિ પુનરુત્પત્તિદર્શનાદ્ અનાત્યન્તિકત્વમ્, ઇતિ સુકરોઽપિ
ઐકાન્તિકાત્યન્તિકદુઃખનિવૃત્તેર્ન દૃષ્ટ ઉપાય ઇતિ નાપાર્થા
જિજ્ઞાસેત્યર્થઃ ॥

યદ્યપિ દુઃખમમઙ્ગલમ્, તથાપિ તત્પરિહારાર્થત્વેન તદપઘાતો
મઙ્ગલમેવેતિ યુક્તં શાસ્ત્રાદૌ તત્કીર્તનમિતિ ॥ ૧॥

કારિકા ૨

સ્યાદેતત્ । મા ભૂદ્ દૃષ્ટ ઉપાયઃ, વૈદિકસ્તુ જ્યોતિષ્ટોમાદિઃ
સહસ્રસંવત્સરપર્યન્તઃ કર્મકલાપસ્તાપત્રયમેકાન્તમત્યન્તઞ્ચાપનેષ્યતિ ।
શ્રુતિશ્ચ- "સ્વર્ગકામો યજેત" ઇતિ । સ્વર્ગશ્ચ-
"યન્ન દુઃખેન સમ્ભિન્નં ન ચ ગ્રસ્તમનન્તરમ્ ।
અભિલાષોપનીતં ચ તત્ સુખં સ્વઃપદાસ્પદમ્ ॥ ઇતિ ।
(તન્ત્રવાર્તિકમ્)
દુઃખવિરોધી સુખવિશેષશ્ચ સ્વર્ગઃ । સ ચ
સ્વસત્તયા સમૂલઘાતમપહન્તિ દુઃખમ્ । ન ચૈષ
ક્ષયી । તથા હિ શ્રૂયતે- ’અપામ સોમમમૃતા અભૂમ"
ઇતિ । તત્ક્ષયે કુતોઽસ્યામૃતત્વસમ્ભવઃ ? તસ્માદ્વૈદિકસ્યોપાયસ્ય
તાપત્રયપ્રતીકારહેતોર્મુહૂર્તયામાહોરાત્રમાસસંવત્સરનિર્વર્તનીયસ્યાનેકજન્મપરમ્પરાયાસસમ્પાદનીયાત્
વિવેકજ્ઞાનાદ્ ઈષત્કરત્વાત્ પુનરપિ વ્યર્થા જિજ્ઞાસા ઇત્યાશઙ્ક્યાહ-

॥ દૃષ્ટવદાનુશ્રવિકઃ, સ હ્યવિશુદ્ધિક્ષયાતિશયયુક્તઃ ।
તદ્વિપરીતઃ શ્રેયાન્ વ્યક્તાવ્યક્તજ્ઞવિજ્ઞાનાત્ ॥ ૨॥

"દૃષ્ટ" ઇતિ । ગુરુપાઠાદનુશ્રૂયતે ઇત્યનુશ્રવો વેદઃ । એતદુક્તં ભવતિ-
'શ્રૂયત એવ પરં ન કેનાપિ ક્રિયતે' ઇતિ । તત્ર ભવ આનુશ્રવિકઃ ।
તત્ર પ્રાપ્તો જ્ઞાત ઇતિ યાવત્ । આનુશ્રવિકોઽપિ કર્મકલાપો દૃષ્ટેન તુલ્યો
વર્તતે, ઐકાન્તિકાત્યન્તિકદુઃખપ્રતીકારાનુપાયત્વસ્યોભયત્રાપિ તુલ્યત્વાત્ ।
યદ્યપિ ચ "આનુશ્રવિકઃ" ઇતિ સામાન્યાભિધાનમ્, તથાપિ કર્મકલાપાભિપ્રાયં
દ્રષ્ટવ્યમ્, વિવેકજ્ઞાનસ્યાપ્યાનુશ્રવિકત્વાત્ । તથા ચ શ્રૂયતે-
"આત્મા વાઽરે જ્ઞાતવ્યઃ પ્રકૃતિતો વિવેક્તવ્યઃ" (બૃહદારણ્યક ૨।૪।૫),
"ન સ પુનરાવર્તતે" (છાન્દોગ્ય ૮।૧૫) ઇતિ ॥

અસ્યાં પ્રતિજ્ઞાયાં હેતુમાહ- સ "હ્યવિશુદ્ધિક્ષયાતિશયયુક્તઃ" ઇતિ ।
"અવિશુદ્ધિઃ" સોમાદિયાગસ્ય પશુબીજાદિવધસાધનતા । યથાઽઽહ
સ્મ ભગવાન્ પઞ્ચશિખાચાર્યઃ- "સ્વલ્પઃ સઙ્કરઃ સપરિહારઃ
સપ્રત્યવમર્ષઃ" ઇતિ । 'સ્વલ્પઃ સઙ્કરો' જ્યોતિષ્ટોમાદિજન્મનઃ
પ્રધાનાપૂર્વસ્ય સ્વલ્પેન પશુહિંસાદિજન્મનાઽનર્થહેતુનાઽપૂર્વેણ સઙ્કરઃ ।
'સપરિહારઃ' કિયતાઽપિ પ્રાયશ્ચિત્તેન પરિહર્તું શક્યઃ ।
અથ ચ પ્રમાદતઃ પ્રાયશ્ચિત્તમપિ નાચરિતમ્, પ્રધાનકર્મવિપાકસમયે
સ પચ્યતે । તથાઽપિ યાવદસાવનર્થં સૂતે તાવત્ પ્રત્યવમર્ષેણ
સહિષ્ણુતયા સહ વર્તત ઇતિ "સપ્રત્યવમર્ષઃ" । મૃષ્યન્તે હિ
પુણ્યસમ્ભારોપનીતસ્વર્ગસુધામહાહ્રદાવગાહિનઃ કુશલાઃ પાપમાત્રોપસાદિતાં
દુઃખવહ્નિકણિકામ્ ॥

ન ચ- "મા હિંસ્યાત્ સર્વા ભૂતાનિ" ઇતિ સામાન્યશાસ્ત્રં વિશેષશાસ્ત્રેણ
"અગ્નીષોમીયં પશુમાલભેત" ઇત્યનેન બાધ્યતે- ઇતિ યુક્તમ્, વિરોધાભાવાત્ ।
વિરોધે હિ બલીયસા દુર્બલો બાધ્યતે । ન ચેહાસ્તિ કશ્ચિદ્વિરોધઃ,
ભિન્નવિષયત્વાત્ ।
તથા હિ- "ન હિંસ્યાદ્" ઇતિ નિષેધેન હિંસાયા અનર્થહેતુભાવો જ્ઞાપ્યતે, ન
ત્વક્રત્વર્થત્વમપિ, "અગ્નીષોમીયં પશુમાલભેત" ઇત્યનેન તુ પશુહિંસાયાઃ
ક્રત્વર્થમુચ્યતે, નાનર્થહેતુત્વાભાવઃ, તથા સતિ વાક્યભેદપ્રસઙ્ગાત્ ।
ન ચાનર્થહેતુત્વક્રતૂપકારકત્વયોઃ કશ્ચિદ્વિરોધોઽસ્તિ । હિંસા હિ
પુરુષસ્ય દોષમાવક્ષ્યતિ, ક્રતોશ્ચોપકરિષ્યતીતિ ।
ક્ષયાતિશયૌ ચ ફલગતાવપ્યુપાયે ઉપચરિતૌ । ક્ષયિત્વં ચ સ્વર્ગાદેઃ
'સત્ત્વે સતિ કાર્યત્વાત્' અનુમિતમ્ । જ્યોતિષ્ટોમાદયઃ સ્વર્ગમાત્રસ્ય સાધનમ્,

વાજપેયાદયસ્તુ સ્વારાજ્યસ્યેત્યતિશયયુક્તત્વમ્ । પરસમ્પદુત્કર્ષો હિ હીનસમ્પદં પુરુષં દુઃખાકરોતિ ॥

"અપામ સોમમમૃતા અભૂમ" ઇતિ ચામૃતત્વાભિધાનમ્ ચિરસ્થેમાનમુપલક્ષયતિ । યદાહુઃ-

"આભૂતસમ્પ્લવં સ્થાનમમૃતત્વં હિ ભાષ્યતે" ઇતિ ॥

અત એવ ચ શ્રુતિઃ-

"ન કર્મણા ન પ્રજયા ધનેન ત્યાગેનૈકેનામૃતત્વમાનશુઃ ।
પરેણ નાકં નિહિતં ગુહાયાં વિભ્રાજતે યદ્યતયો વિશન્તિ" ઇતિ (મહાનારાયણ, ૧૦।૫) ।
તથા "કર્મણા મૃત્યુમૃષયો નિષેદુઃ પ્રજાવન્તો દ્રવિણમીહમાનાઃ ।
તથા પરે ઋષયો યે મનીષિણઃ પરં કર્મભ્યોઽમૃતત્વમાનશુઃ" ઇતિ ચ ॥

તદેતત્ સર્વમભિપ્રેત્યાહ- "તદ્વિપરીતઃ શ્રેયાન્, વ્યક્તાવ્યક્તજ્ઞવિજ્ઞાનાત્" ઇતિ । તસ્માત્ - આનુશ્રવિકાત્ દુઃખપઘાતકોપાયાત્ સોમપાનાદેરવિશુદ્ધાદ્ અનિત્યસાતિશયફલાત્ વિપરીતઃ વિશુદ્ધઃ હિંસાદિસઙ્કરાભાવાત્, નિત્યનિરતિશયફલઃ, અસકૃત્ પુનરાવૃત્તિશ્રુતેઃ । ન ચ કાર્યત્વેનાનિત્યતા ફલસ્ય યુક્તા, ભાવકાર્યસ્ય તથાત્વાત્, દુઃખપ્રધ્વંસસ્ય તુ કાર્યસ્યાપિ તદ્વૈપરીત્યાત્ । ન ચ દુઃખાન્તરોત્પાદઃ, કારણાપ્રવૃત્તૌ કાર્યસ્યાનુત્પાદાત્, વિવેકજ્ઞાનોપજનનપર્યન્તત્વાચ્ચ કારણપ્રવૃત્તેઃ । એતચ્ચોપરિષ્ટાદુપપાદયિષ્યતે ॥

અક્ષરાર્થસ્તુ- તસ્માત્ - આનુશ્રવિકાત્ દુઃખાપઘાતકાદ્ હેતોઃ, વિપરીતઃ - સત્ત્વપુરુષાન્યતાપ્રત્યયઃ સાક્ષાત્કારો દુઃખાપઘાતકો હેતુઃ, અત એવ શ્રેયાન્ । આનુશ્રવિકો હિ વેદવિહિતત્વાત્ માત્રયા દુઃખાપઘાતકત્વાચ્ચ પ્રશસ્યઃ । સત્ત્વપુરુષાન્યતાપ્રત્યયોઽપિ પ્રશસ્યઃ । તદનયોઃ પ્રશસ્યયોર્મધ્યે સત્ત્વપુરુષાન્યતાપ્રત્યયઃ શ્રેયાન્ ॥

કુતઃ પુનરસ્યોત્પત્તિઃ ? ઇત્યત આહ- "વ્યક્તાવ્યક્તજ્ઞવિજ્ઞાનાત્" ઇતિ । વ્યક્તં ચ અવ્યક્તં ચ જ્ઞશ્ચ વ્યક્તાવ્યક્તજ્ઞાઃ, તેષાં વિજ્ઞાનં વિવેકેન જ્ઞાનમ્, વ્યક્તાવ્યક્તજ્ઞવિજ્ઞાનમ્ । વ્યક્તજ્ઞાનપૂર્વકમવ્યક્તસ્ય તત્કારણસ્ય જ્ઞાનમ્ । તયોઃ પારાર્થ્યેનાત્મા પરો જ્ઞાયતે, ઇતિ જ્ઞાનક્રમેણાભિધાનમ્ ।

એતદુક્તં ભવતિ- શ્રુતિસ્મૃતીતિહાસપુરાણેભ્યો વ્યક્તાદીન્ વિવેકેન શ્રુત્વા, શાસ્ત્રયુક્ત્યા ચ વ્યવસ્થાપ્ય, દીર્ઘકાલાદરનૈરન્તર્યસત્કારસેવિતાત્ ભાવનામયાત્ વિજ્ઞાનમિતિ । તથા ચ વક્ષ્યતિ-
એવં તત્ત્વાભ્યાસાન્નાસ્મિ ન મે નાહમિત્યપરિશેષમ્ ।
અવિપર્યયાદ્વિશુદ્ધં કેવલમુત્પદ્યતે જ્ઞાનમ્ ॥ ઇતિ (કારિકા ૬૪) ॥ ૨॥

કારિકા ૩

તદેવં પ્રેક્ષાવદપેક્ષિતાર્થત્વેન શાસ્ત્રારમ્ભં સમાધાય શાસ્ત્રમારભમાણઃ શ્રોતૃબુદ્ધિસમવધાનાય તદર્થં સંક્ષેપતઃ પ્રતિજાનીતે-

॥ મૂલપ્રકૃતિરવિકૃતિર્મહદાદ્યાઃ પ્રકૃતિવિકૃતયઃ સપ્ત ।
ષોડશકસ્તુ વિકારો, ન પ્રકૃતિર્ન વિકૃતિઃ પુરુષઃ ॥ ૩॥

સંક્ષેપતો હિ શાસ્ત્રાર્થસ્ય ચતસ્રો વિધાઃ । કશ્ચિદર્થઃ પ્રકૃતિરેવ, કશ્ચિદર્થો વિકૃતિરેવ, કશ્ચિત્પ્રકૃતિવિકૃતિઃ, કશ્ચિદનુભયરૂપઃ । તત્ર કા પ્રકૃતિઃ ? ઇત્યુક્તમ્- "મૂલપ્રકૃતિરવિકૃતિઃ" ઇતિ । પ્રકરોતીતિ પ્રકૃતિઃ પ્રધાનમ્, સત્ત્વરજસ્તમસાં સામ્યાવસ્થા, સા અવિકૃતિઃ, પ્રકૃતિરેવેત્યર્થઃ । કુતઃ ? ઇત્યુક્તમ્, "મૂલેતિ" મૂલઞ્ચાસૌ પ્રકૃતિશ્ચેતિ મૂલપ્રકૃતિઃ । વિશ્વસ્ય કાર્યસઙ્ઘાતસ્ય સા મૂલમ્, ન ત્વસ્યા મૂલાન્તરમસ્તિ, અનવસ્થાપ્રસઙ્ગાત્ । ન ચાનવસ્થાયાં પ્રમાણમસ્તીતિ ભાવઃ ॥

કતમાઃ પુનઃ પ્રકૃતિવિકૃતયઃ, કિયત્યશ્ચ ? ઇત્યત ઉક્તમ્- "મહદાદ્યાઃ પ્રકૃતિવિકૃતયઃ સપ્ત" ઇતિ । પ્રકૃતયશ્ચ વિકૃતયશ્ચ તા ઇતિ પ્રકૃતિવિકૃતયઃ સપ્ત ।
તથા હિ- મહત્તત્ત્વમહઙ્કારસ્ય પ્રકૃતિઃ, વિકૃતિશ્ચ મૂલપ્રકૃતેઃ । એવમહઙ્કારતત્ત્વં તન્માત્રાણામિન્દ્રિયાણાં ચ પ્રકૃતિઃ વિકૃતિશ્ચ મહતઃ । એવં પઞ્ચતન્માત્રાણિ તત્ત્વાનિ ભૂતાનામાકાશાદીનાં પ્રકૃતયો વિકૃતયશ્ચાહઙ્કારસ્ય ॥

અથ કા વિકૃતિરેવ, કિયતી ચેત્યત ઉક્તમ્- "ષોડશકસ્તુ વિકારઃ" ઇતિ । ષોડશસંખ્યાપરિમિતો ગણઃ ષોડશકઃ । તુશબ્દોઽવધારણે ભિન્નક્રમશ્ચ । પઞ્ચમહાભૂતાનિ એકાદશ ઇન્દ્રિયાણિ ચેતિ ષોડશકો ગણો

વિકાર એવ, ન પ્રકૃતિરિતિ । યદ્યપિ ચ પૃથિવ્યાદીનાં ગોઘટવૃક્ષાદયો વિકારાઃ, એવં તદ્વિકારભેદાનાં પયોબીજાદીનાં દધ્યઙ્કુરાદયઃ, તથાઽપિ ગવાદયો બીજાદયો વા ન પૃથિવ્યાદિભ્યસ્તત્ત્વાન્તરમ્ । 'તત્ત્વાન્તરોપાદાનત્વં ચ પ્રકૃતિત્વમ્' ઇહાભિપ્રેતમિતિ ન દોષઃ । સર્વેષાં ગોઘટાદીનાં સ્થૂલતેન્દ્રિયગ્રાહ્યતા ચ સમેતિ ન તત્ત્વાન્તરત્વમ્ ।
અનુભયરૂપમુક્તં, તદાહ - "ન પ્રકૃતિર્ન વિકૃતિઃ પુરુષઃ" ઇતિ ।
એતચ્ચ સર્વમુપરિષ્ટાદુપપાદયિષ્યતે ॥ ૩॥

કારિકા ૪

તમિમમર્થં પ્રામાણિકં કર્તુમભિમતાઃ પ્રમાણભેદા લક્ષણીયાઃ । ન ચ સામાન્યલક્ષણમન્તરેણ શક્યતે વિશેષલક્ષણં કર્તુમિતિ પ્રમાણસામાન્યં તાવલ્લક્ષયતિ-

॥ દૃષ્ટમનુમાનમાપ્તવચનં ચ, સર્વપ્રમાણસિદ્ધત્વાત્ ।
ત્રિવિધં પ્રમાણમિષ્ટં પ્રમેયસિદ્ધિઃ પ્રમાણાદ્ધિ ॥ ૪॥

અત્ર ચ 'પ્રમાણમ્' ઇતિ સમાખ્યયા લક્ષ્યપદમ્ । તન્નિર્વચનં ચ લક્ષણમ્ । પ્રમીયતેઽનેનેતિ નિર્વચનાત્ પ્રમાં પ્રતિ કરણત્વમવગમ્યતે ।
અસન્દિગ્ધાવિપરીતાનધિગતવિષયા ચિત્તવૃત્તિઃ । બોધશ્ચ પૌરુષેયઃ ફલં પ્રમા । તત્સાધનં પ્રમાણમિતિ । એતેન સંશયવિપર્યયસ્મૃતિસાધનેષ્વપ્રમાણેષ્વપ્રસઙ્ગઃ ॥

સંખ્યાવિપ્રતિપત્તિં નિરાકરોતિ- "ત્રિવિધમ્" ઇતિ । તિસ્રો વિધા અસ્ય પ્રમાણસામાન્યસ્ય તત્ ત્રિવિધં, ન ન્યૂનં, નાપ્યધિકમિત્યર્થઃ ।
વિશેષલક્ષણાનન્તરં ચૈતદુપપાદયિષ્યામઃ ।
કતમાઃ પુનસ્તા વિધા ? ઇત્યત આહ- "દૃષ્ટમનુમાનમાપ્તવચનં ચ" ઇતિ । એતચ્ચ લૌકિકપ્રમાણાભિપ્રાયમ્, લોકવ્યુત્પાદનાર્થત્વાચ્છાસ્ત્રસ્ય, તસ્યૈવાત્રાધિકારાત્ । આર્ષં તુ વિજ્ઞાનં યોગિનામૂર્ધ્વસ્રોતસાં ન લોકવ્યુત્પાદનાયાલમિતિ સદપિ નાભિહિતમ્, અનધિકારાત્ ॥

સ્યાદેતત્ - મા ભૂન્ન્યૂનમ્, અધિકં તુ કસ્માન્ન ભવતિ, સઙ્ગિરન્તે હિ પ્રતિવાદિન ઉપમાનાદીન્યપિ પ્રમાણાનિ, ઇત્યત આહ- "સર્વપ્રમાણસિદ્ધત્વાત્" ઇતિ । એષ્વેવ દૃષ્ટાનુમાનાપ્તવચનેષુ સર્વેષાં પ્રમાણાનાં સિદ્ધત્વાત્- અન્તર્ભાવાદિત્યર્થઃ । એતચ્ચોપપાદયિષ્યત ઇત્યુક્તમ્ ।
અથ પ્રમેયવ્યુત્પાદનાય પ્રવૃત્તં શાસ્ત્રં કસ્માત્ પ્રમાણં સામાન્યતો

વિશેષતશ્ચ લક્ષયતિ ? ઇત્યત આહ- "પ્રમેયસિદ્ધિઃ પ્રમાણાદ્ધિ" ઇતિ ।
સિદ્ધિઃ પ્રતીતિઃ ।
સેયમાર્યાઽર્થક્રમાનુરોધેન પાઠક્રમમનાદૃત્યૈવ વ્યાખ્યાતા ॥ ૪॥

કારિકા ૫

સમ્પ્રતિ પ્રમાણવિશેષલક્ષણાવસરે પ્રત્યક્ષસ્ય પ્રમાણેષુ જ્યેષ્ઠત્વાત્
તદધીનત્વાચ્ચાનુમાનાદીનાં, સર્વવાદિનામવિપ્રતિપત્તેશ્ચ, તદેવ
તાવલ્લક્ષયતિ-
॥ પ્રતિવિષયાધ્યવસાયો દૃષ્ટં, ત્રિવિધમનુમાનમાખ્યાતમ્ ।
તલ્લિઙ્ગલિઙ્ગિપૂર્વકમાપ્તશ્રુતિરાપ્તવચનં તુ ॥ ૫॥

"પ્રતિવિષયાધ્યવસાયો દૃષ્ટમ્" ઇતિ । અત્ર "દૃષ્ટમ્" ઇતિ
લક્ષ્યનિર્દેશઃ, પરિશિષ્ટં તુ લક્ષણમ્ । સમાનાસમાનજાતીયવ્યવચ્છેદો
લક્ષણાર્થઃ ॥

અવયવાર્થસ્તુ- વિસિન્વન્તિ વિષયિણમનુબધ્નન્તિ સ્વેન રૂપેણ
નિરૂપણીયં કુર્વન્તીતિ યાવત્ । "વિષયાઃ" પૃથિવ્યાદયઃ સુખાદયશ્ચ,
અસ્મદાદીનામવિષયાઃ તન્માત્રલક્ષણાઃ યોગિનામૂર્ધ્વસ્રોતસાં ચ વિષયાઃ,
વિષયં વિષયં પ્રતિ વર્તત ઇતિ પ્રતિવિષયમ્ । વૃત્તિશ્ચ સન્નિકર્ષઃ ।
અર્થસન્નિકૃષ્ટમિન્દ્રિયમિત્યર્થઃ । તસ્મિન્ અધ્યવસાયઃ, તદાશ્રિત
ઇત્યર્થઃ । અધ્યવસાયશ્ચ બુદ્ધિવ્યાપારો જ્ઞાનમ્, ઉપાત્તવિષયાણામિન્દ્રિયાણાં
વૃત્તૌ સત્યાં બુદ્ધેસ્તમોઽભિભવે સતિ યઃ સત્ત્વસમુદ્રેકઃ,
સોઽધ્યવસાય ઇતિ વૃત્તિરિતિ જ્ઞાનમિતિ ચાખ્યાયતે । ઇદં તત્ પ્રમાણમ્ ।
અનેન યશ્ચેતનાશક્તેરનુગ્રહસ્તત્ફલં, પ્રમા બોધઃ ।
બુદ્ધિતત્ત્વં હિ પ્રાકૃતત્વાદચેતનમિતિ તદીયોઽધ્યવસાયોઽપ્યચેતનઃ
ઘટાદિવત્ । એવં બુદ્ધિતત્ત્વસ્ય સુખાદયોઽપિ પરિણામભેદા અચેતનાઃ ।
પુરુષસ્તુ સુખાદ્યનનુષઙ્ગી ચેતનઃ । સોઽયં બુદ્ધિતત્ત્વવર્તિના
જ્ઞાનસુખાદિના તત્પ્રતિબિમ્બિતસ્તચ્છાયાપત્ત્યા જ્ઞાનસુખાદિમાનિવ
ભવતીતિ ચેતનોઽનુગૃહ્યતે । ચિતિચ્છાયાપત્ત્યા ચાચેતનાઽપિ
બુદ્ધિસ્તદધ્યવસાયોઽપ્યચેતનશ્ચેતનવદ્ ભવતીતિ । તથા ચ વક્ષ્યતિ-
તસ્માત્તત્સંયોગાદચેતનં ચેતનાવદિવ લિઙ્ગમ્ ।
ગુણકર્તૃત્વેઽપિ તથા કર્તેવ ભવત્યુદાસીનઃ ॥ (કા૦ ૨૧) ઇતિ ।
અત્રાધ્યવસાયગ્રહણેન સંશયં વ્યવચ્છિનત્તિ,

સંશયસ્યાનવસ્થિતગ્રહણેનાનિશ્ચિતરૂપત્વાત્ । નિશ્ચયોઽધ્યવસાય ઇતિ ચાનર્થાન્તરમ્ । વિષયગ્રહણેન ચાસદ્વિષયં વિપર્યયમપાકરોતિ । પ્રતિગ્રહણેન ચેન્દ્રિયાર્થસન્નિકર્ષસૂચનાદનુમાનસ્મૃત્યાદયઃ પરાકૃતા ભવન્તિ ।

તદેવં સમાનાસમાનજાતીયવ્યવચ્છેદકત્વાત્ "પ્રતિવિષયાધ્યવસાયઃ" ઇતિ દૃષ્ટસ્ય સમ્પૂર્ણં લક્ષણમ્ । તન્ત્રાન્તરેષુ લક્ષણાન્તરાણિ તૈર્થિકાનાં ન દૂષિતાનિ, વિસ્તરભયાદિતિ ।

'નાનુમાનં પ્રમાણમ્'ઇતિ વદતા લોકાયતિકેનાપ્રતિપન્નઃ સન્દિગ્ધો વિપર્યસ્તો વા પુરુષઃ કથં પ્રતિપદ્યેત ? ન ચ પુરુષાન્તરગતા અજ્ઞાનસન્દેહવિપર્યયાઃ શક્યા અર્વાગ્દૃશા પ્રત્યક્ષેણ પ્રતિપત્તુમ્ । નાપિ પ્રમાણાન્તરેણ, અનભ્યુપગમાત્ । અનવધૃતાજ્ઞાનસંશયવિપર્યયસ્તુ યં કઞ્ચન પુરુષં પ્રતિ વર્તમાનોઽનવધેયવચનતયા પ્રેક્ષાવદ્ભિરુન્મત્તવદુપેક્ષ્યેત । તદનેનાજ્ઞાનાદયઃ પરપુરુષવર્તિનોઽભિપ્રાયભેદાદ્વચનભેદાદ્ વા લિઙ્ગાદનુમાતવ્યાઃ, ઇત્યકામેનાપ્યનુમાનં પ્રમાણમભ્યુપેયમ્ ।

તત્ર પ્રત્યક્ષકાર્યત્વાદનુમાનં પ્રત્યક્ષાનન્તરં લક્ષણીયમ્ ।

તત્રાપિ સામાન્યલક્ષણપૂર્વકત્વાદ્વિશેષલક્ષણસ્યેત્યનુમાનસામાન્યં તાવલ્લક્ષયતિ- "તલ્લિઙ્ગલિઙ્ગિપૂર્વકમ્" ઇતિ । લિઙ્ગં વ્યાપ્યં, લિઙ્ગિ વ્યાપકમ્ । શઙ્કિતસમારોપિતોપાધિનિરાકરણેન ચ વસ્તુસ્વભાવપ્રતિબદ્ધં વ્યાપ્યમ્, યેન ચ પ્રતિબદ્ધં, તદ્વ્યાપકમ્ । લિઙ્ગલિઙ્ગિગ્રહણેન ચ વિષયવાચિના વિષયિણં પ્રત્યયમુપલક્ષયતિ । 'ધૂમાદિર્વ્યાપ્યો વહ્ન્યાદિર્વ્યાપકઃ' ઇતિ યઃ પ્રત્યયસ્તત્પૂર્વકમ્ । લિઙ્ગિગ્રહણં ચાવર્તનીયમ્ । તેન ચ લિઙ્ગમસ્યાસ્તીતિ પક્ષધર્મતાજ્ઞાનમપિ દર્શિતં ભવતિ । તત્ 'વ્યાપ્યવ્યાપકભાવપક્ષધર્મતાજ્ઞાનપૂર્વકમનુમાનમ્'ઇતિ- અનુમાનસામાન્યં લક્ષિતમ્ ।

અનુમાનવિશેષાન્ તન્ત્રાન્તરલક્ષિતાન્ અભિમતાન્ સ્મારયતિ- "ત્રિવિધમનુમાનમાખ્યાતમ્" ઇતિ, તત્ સામાન્યતો લક્ષિતમનુમાનં વિશેષતસ્ત્રિવિધં, પૂર્વવત્, શેષવત્, સામાન્યતો દૃષ્ટઞ્ચેતિ ।

તત્ર પ્રથમં તાવત્ દ્વિવિધં- વીતમવીતં ચ । અન્વયમુખેન પ્રવર્તમાનં વિધાયકં વીતમ્, વ્યતિરેકમુખેન પ્રવર્તમાનં નિષેધકમવીતમ્ ।

તત્રાવીતં શેષવત્ । શિષ્યતે પરિશિષ્યા ઇતિ શેષઃ, સ એવ વિષયતયા યસ્યાસ્ત્યનુમાનજ્ઞાનસ્ય તચ્છેષવત્ । યદાહુઃ- 'પ્રસક્તપ્રતિષેધે, અન્યત્રાપ્રસઙ્ગાત્ શિષ્યમાણે સમ્પ્રત્યયઃ પરિશેષઃ' ઇતિ (ન્યાયભાષ્યમ્) ।

અસ્ય ચાવીતસ્ય વ્યતિરેકિણ ઉદાહરણમગ્રેઽભિધાસ્યતે ।
વીતં ચ દ્વેધા- પૂર્વવત્, સામાન્યતો દૃષ્ટં ચ । તત્રૈકં
દૃષ્ટસ્વલક્ષણસામાન્યવિષયં યત્ તત્પૂર્વવત્, પૂર્વં પ્રસિદ્ધં
દૃષ્ટસ્વલક્ષણસામાન્યમિતિ યાવત્, તદસ્ય વિષયત્વેનાસ્ત્યનુમાનસ્યેતિ
પૂર્વવત્ । યથા ધૂમાત્ વહ્નિત્વસામાન્યવિશેષઃ પર્વતેઽનુમીયતે, તસ્ય
વહ્નિત્વસામાન્યવિશેષસ્ય સ્વલક્ષણં વહ્નિવિશેષો દૃષ્ટો રસવત્યામ્ ।
અપરં ચ વીતં સામાન્યતો દૃષ્ટમ્- અદૃષ્ટસ્વલક્ષણસામાન્યવિષયમ્ ।
યથેન્દ્રિયવિષયમનુમાનમ્ । અત્ર હિ રૂપાદિવિજ્ઞાનાનાં ક્રિયાત્વેન
કરણવત્ત્વમનુમીયતે । યદ્યપિ કરણત્વસામાન્યસ્ય છિદાદૌ
વાસ્યાદિ સ્વલક્ષણમુપલબ્ધમ્, તથાઽપિ યજ્જાતીયં રૂપાદિજ્ઞાને
કરણવત્ત્વમનુમીયતે તજ્જાતીયસ્ય કરણસ્ય ન દૃષ્ટં સ્વલક્ષણં
પ્રત્યક્ષેણ । ઇન્દ્રિયજાતીયં હિ તત્કરણમ્, નચેન્દ્રિયત્વસામાન્યસ્ય
સ્વલક્ષણમિન્દ્રિયવિશેષઃ પ્રત્યક્ષગોચરોઽર્વાગ્દૃશામ્, યથા
વહ્નિત્વસામાન્યસ્ય સ્વલક્ષણં વહ્નિઃ । સોઽયં પૂર્વવતઃ સામાન્યતોદૃષ્ટાત્
સત્યપિ વીતત્વેન તુલ્યત્વે વિશેષઃ । અત્ર ચ દૃષ્ટં દર્શનમ્,
સામાન્યત ઇતિ સામાન્યસ્ય, સાર્વવિભક્તિકસ્તસિઃ । અદૃષ્ટસ્વલક્ષણસ્ય
સામાન્યવિશેષસ્ય દર્શનં સામાન્યતોદૃષ્ટમનુમાનમિત્યર્થઃ ।
સર્વં ચૈતદસ્માભિર્ન્યાયવાર્તિકતાત્પર્યટીકાયાં વ્યુત્પાદિતમિતિ નેહોક્તં
વિસ્તરભયાત્ ।
પ્રયોજકવૃદ્ધશબ્દશ્રવણસમનન્તરં
પ્રયોજ્યવૃદ્ધપ્રવૃત્તિહેતુજ્ઞાનાનુમાનપૂર્વકત્વાચ્છબ્દાર્થસમ્બન્ધગ્રહણસ્ય,
સ્વાર્થસમ્બન્ધજ્ઞાનસહકારિણશ્ચ
શબ્દસ્યાર્થપ્રત્યાયકત્વાદનુમાનપૂર્વકત્વમિત્યનુમાનાન્તરં
શબ્દં લક્ષયતિ- "આપ્તશ્રુતિરાપ્તવચનં તુ" ઇતિ । આપ્તવચનમિતિ
લક્ષ્યનિર્દેશઃ, પરિશિષ્ટં લક્ષણમ્ । આપ્તા પ્રાપ્તા યુક્તેતિ યાવત્ । આપ્તા
ચાસૌ શ્રુતિશ્ચેતિ આપ્તશ્રુતિઃ । શ્રુતિઃ- વાક્યજનિતં વાક્યાર્થજ્ઞાનમ્ ।
તચ્ચ સ્વતઃપ્રમાણમ્ । અપૌરુષેયવેદવાક્યજનિતત્વેન
સકલદોષાશઙ્કાવિનિર્મુક્તેર્યુક્તં ભવતિ । એવં
વેદમૂલસ્મૃતીતિહાસપુરાણવાક્યજનિતમપિ જ્ઞાનં યુક્તં ભવતિ ।
આદિવિદુષશ્ચ કપિલસ્ય કલ્પાદૌ કલ્પાન્તરાધીતશ્રુતિવિસ્મરણસમ્ભવઃ,
સુપ્તપ્રબુદ્ધસ્યેવ પૂર્વેદ્યુરવગતાનામર્થાનામપરેદ્યુઃ ।
તથા ચ આવટ્યજૈગીષવ્યસંવાદે ભગવાન્ જૈગીષવ્યો

દશમહાકલ્પવર્તિજન્મસ્મરણમાત્મન ઉવાચ " દશસુ મહાકલ્પેષુ
વિપરિવર્તમાનેન મયા " ઇત્યાદિના ગ્રન્થસન્દર્ભેણ ।
આપ્તગ્રહણેનાયુક્તાઃ શાક્યભિક્ષુનિર્ગ્રન્થકસંસારમોચકાદિનામાગમાભાસાઃ
પરિહૃતા ભવન્તિ । અયુક્તત્વં ચૈતેષાં વિગાનાત્ વિચ્છિન્નમૂલત્વાત્
પ્રમાણવિરુદ્ધાર્થાભિધાનાચ્ચ, કૈશ્ચિદેવ મ્લેચ્છાદિભિઃ પુરુષાપસદૈઃ
પશુપ્રાયૈઃ પરિગ્રહાદ્બોદ્ધવ્યમ્ ।
તુશબ્દેનાનુમાનાદ્વ્યવચ્છિનત્તિ । વાક્યાર્થો હિ પ્રમેયઃ, ન
તુ તદ્ધર્મો વાક્યમ્, યેન તત્ર લિઙ્ગં ભવેત્ । ન ચ વાક્યં
વાક્યાર્થં બોધયત્ સમ્બન્ધગ્રહણમપેક્ષતે, અભિનવકવિરચિતસ્ય
વાક્યસ્યાદૃષ્ટપૂર્વસ્યાનનુભૂતચરવાક્યાર્થબોધકત્વાદિતિ ।
એવં પ્રમાણસામાન્યલક્ષણેષુ તદ્વિશેષલક્ષણેષુ ચ સત્સુ, યાનિ
પ્રમાણાન્તરાણ્યુપમાનાદીનિ પ્રતિવાદિભિરભ્યુપેયન્તે તાન્યુક્તલક્ષણેષ્વેવ
પ્રમાણેષ્વન્તર્ભવન્તિ ।
તથા હિ - ઉપમાનં તાવત્ 'યથા ગૌસ્તથા ગવયઃ' ઇતિ વાક્યમ્ । તજ્જનિતા
ધીરાગમ એવ । યોઽપ્યયં 'ગવયશબ્દો ગોસદૃશસ્ય વાચકઃ' ઇતિ
પ્રત્યયઃ, સોઽપ્યનુમાનમેવ । યો હિ શબ્દો યત્ર વૃદ્ધૈઃ પ્રયુજ્યતે,
સોઽસતિ વૃત્ત્યન્તરે, તસ્ય વાચકઃ, યથા ગોશબ્દો ગોત્વસ્ય ।
પ્રયુજ્યતે ચૈવં ગવયશબ્દો ગોસદૃશે, ઇતિ તસ્યૈવ વાચક
ઇતિ તત્ જ્ઞાનમનુમાનમેવ । યત્તુ ગવયસ્ય ચક્ષુઃસન્નિકૃષ્ટસ્ય
ગોસાદૃશ્યજ્ઞાનં તત્ પ્રત્યક્ષમેવ । અત એવ સ્મર્યમાણાયાં ગવિ
ગવયસાદૃશ્યજ્ઞાનં પ્રત્યક્ષમ્ । ન ત્વન્યદ્ગવિ સાદૃશ્યમ્ ।
અન્યચ્ચ ગવયે । ભૂયોઽવયવસામાન્યયોગો હિ જાત્યન્તરવર્તી જાત્યન્તરે
સાદૃશ્યમુચ્યતે । સામાન્યયોગશ્ચૈકઃ । સ ચેદ્ગવયે પ્રત્યક્ષઃ,
ગવ્યપિ તથેતિ નોપમાનસ્ય પ્રમેયાન્તરમસ્તિ, યત્ર પ્રમાણાન્તરમુપમાનં
ભવેત્, ઇતિ ન પ્રમાણાન્તરમુપમાનમ્ ।
એવમર્થાપત્તિરપિ ન પ્રમાણાન્તરમ્ ।
તથા હિ- જીવતશ્ચૈત્રસ્ય ગૃહાભાવદર્શનેન બહિર્ભાવસ્યાદૃષ્ટસ્ય
કલ્પનમર્થાપત્તિરભિમતા વૃદ્ધાનામ્ । સાઽપ્યનુમાનમેવ । યદા
ખલ્વવ્યાપકઃ સન્નેકત્ર નાસ્તિ તદાઽન્યત્રાસ્તિ । યદાઽવ્યાપક એકત્રાસ્તિ
તદાઽન્યત્ર નાસ્તિ, ઇતિ સુકરઃ સ્વશરીરે વ્યાપ્તિગ્રહઃ । તથા ચ
સતો ગૃહાભાવદર્શનેન લિઙ્ગેન બહિર્ભાવદર્શનમનુમાનમેવ ।

ન ચ ચૈત્રસ્ય ક્વચિત્સત્ત્વેન ગૃહાભાવઃ શક્યોઽપહ્નોતુમ્,
યેનાસિદ્ધો ગૃહાભાવો બહિર્ભાવે ન હેતુઃ સ્યાત્ । ન ચ ગૃહાભાવેન વા
સત્ત્વમપહ્નૂયતે, યેન સત્ત્વમેવાનુપપદ્યમાનમાત્માનં ન બહિરવસ્થાપયેત્ ।
તથા હિ- ચૈત્રસ્ય ગૃહાસત્ત્વેન સત્ત્વમાત્રં વિરુધ્યતે, ગૃહસત્ત્વં
વા ? ન તાવદ્યત્ર ક્વચન સત્ત્વસ્યાસ્તિ વિરોધો ગૃહાસત્ત્વેન,
ભિન્નવિષયત્વાત્ । દેશસામાન્યેન ગૃહવિશેષાક્ષેપિઽપિ પાક્ષિક ઇતિ
સામાન્યવિષયતયા વિરોધ ઇતિ ચેત્, પ્રમાણવિનિશ્ચિતસ્ય ગૃહેઽસત્ત્વસ્ય
પાક્ષિકતયા સાંશયિકેન ગૃહસત્ત્વેન પ્રતિક્ષપાયોગાત્ । નાપિ
પ્રમાણનિશ્ચિતો ગૃહાભાવઃ પાક્ષિકમસ્ય ગૃહસત્ત્વં પ્રતિક્ષિપન્
સત્ત્વમપિ પ્રતિક્ષેપ્તું સાંશયિકત્વં ચ વ્યપનેતુર્મહતીતિ યુક્તમ્ ।
ગૃહાવચ્છિન્નેન ચૈત્રાભાવેન ગૃહસત્ત્વં વિરુદ્ધ્યતે, ન તુ
સત્ત્વમાત્રમ્, તસ્ય તત્રૌદાસીન્યાત્ । તસ્માદ્ગૃહાભાવેન લિઙ્ગેન સિદ્ધેન
સતો બહિર્ભાવોઽનુમીયત ઇતિ યુક્તમ્ ।
એતેન- 'વિરુદ્ધયોઃ
પ્રમાણયોર્વિષયવ્યવસ્થયાઽવિરોધાપાદનમર્થાપત્તેર્વિષયઃ'
ઇતિ નિરસ્તમ્, અવચ્છિન્નાનવચ્છિન્નયોર્વિરોધાભાવાત્ ।
ઉદાહરણાન્તરાણિ ચાર્થાપત્તેરેવમેવાનુમાનેઽન્તર્ભાવનીયાનિ ।
તસ્માન્નાનુમાનાત્પ્રમાણાન્તરમર્થાપત્તિરિતિ સિદ્ધમ્ ।
એવમભાવોઽપિ પ્રત્યક્ષમેવ । ન હિ ભૂતલસ્ય પરિણામવિશેષાત્
કૈવલ્યલક્ષણાદન્યો ઘટાભાવો નામ । પ્રતિક્ષણપરિણામિનો હિ સર્વે
એવ ભાવાઃ, ઋતે ચિતિશક્તેઃ । સ ચ પરિણામભેદ ઐન્દ્રિયક ઇતિ નાસ્તિ
પ્રત્યક્ષાનવરુદ્ધો વિષયો યત્રાઽભાવાખ્યં પ્રમાણાન્તરમભ્યુપેયેતેતિ ।
સમ્ભવસ્તુ, યથા ખાર્યાં દ્રોણાઢકપ્રસ્ત્યાદ્યવગમઃ । સ ચાનુમાનમેવ ।
ખારીત્વં હિ દ્રોણાદ્યવિનાભૂતં પ્રતીતં ખાર્યાં દ્રોણાદિસત્ત્વમવગમયતિ ।
યચ્ચાનિર્દિષ્ટપ્રવક્તૃકં પ્રવાદપારમ્પર્યમાત્રમ્- 'ઇતિ હોચુર્વૃદ્ધાઃ'
ઇત્યૈતિહ્યમ્ । યથા 'ઇહ વટે યક્ષઃ પ્રતિવસતિ' ઇતિ, ન તત્ પ્રમાણાન્તરમ્ ।
અનિર્દિષ્ટપ્રવક્તૃકત્વેન સાંશયિકત્વાત્ । આપ્તવક્તૃકત્વનિશ્ચયે
ત્વાગમ એવ, ઇત્યુપપન્નં "ત્રિવિધમ્પ્રમાણમ્" ઇતિ ।

કારિકા ૬

એવં તાવદ્વ્યક્તાવ્યક્તજ્ઞલક્ષણપ્રમેયસિદ્ધ્યર્થં પ્રમાણાનિ લક્ષિતાનિ ।
તત્ર વ્યક્તં પૃથિવ્યાદિ સ્વરૂપતઃ પાંસુલપાદો હાલિકોઽપિ પ્રત્યક્ષતઃ

પ્રતિપદ્યતે, પૂર્વવતા ચાનુમાનેન ધૂમાદિદર્શનાત્ વહ્ન્યાદીનિ ચેતિ,
તદ્વ્યુત્પાદનાય મન્દપ્રયોજનં શાસ્ત્રમિતિ દુરધિગમમનેન વ્યુત્પાદ્યમ્ ।
તત્ર યત્ પ્રમાણં યત્ર શક્તં તદુક્તલક્ષણેભ્યઃ પ્રમાણેભ્યો નિષ્કૃષ્ય
દર્શયતિ -

॥ સામાન્યતસ્તુ દૃષ્ટાત્ અતીન્દ્રિયાણાં પ્રતીતિરનુમાનાત્ ।
તસ્માદપિ ચાસિદ્ધમ્ પરોક્ષામ્રાગમાત્ સિદ્ધમ્ ॥ ૬॥

"સામાન્યતઃ" ઇતિ । તુશબ્દઃ પ્રત્યક્ષપૂર્વવદ્ભ્યાં વિશિનષ્ટિ ।
સામાન્યતોદૃષ્ટાદનુમાનાદતીન્દ્રિયાણાં પ્રધાનપુરુષાદીનાં પ્રતીતિઃ
- ચિતિચ્છાયાપત્તિર્બુદ્ધેરધ્યવસાય ઇત્યર્થઃ । ઉપલક્ષણં
ચૈતત્, શેષવત ઇત્યપિ દ્રષ્ટવ્યમ્ । તત્કિં સર્વેષ્વતીન્દ્રિયેષુ
સામાન્યતોદૃષ્ટમેવ પ્રવર્ત્તતે ? તથા ચ યત્ર તન્નાસ્તિ,
મહદાદ્યારમ્ભક્રમે સ્વર્ગાપૂર્વદેવતાદૌ ચ, તત્ર તેષામભાવઃ પ્રાપ્ત
ઇત્યત આહ - "તસ્માદપિ" ઇતિ । તસ્માદપીત્યેતાવતૈવ સિદ્ધે ચકારેણ
શેષવત્ ઇત્યપિ સમુચ્ચિતમ્ ॥

કારિકા ૭

સ્યાદેતત્, યથા ગગનકુસુમકૂર્મરોમશશવિષાણાદ્ષુ
પ્રત્યક્ષમપ્રવર્તમાનં તદભાવમવગમયતિ, એવં પ્રધાનાદિષ્વપિ ।
તત્કથં તેષાં સામાન્યતોદૃષ્ટાદિભ્યઃ સિદ્ધિરિત્યત આહ -

॥ અતિદૂરાત્ સામીપ્યાત્ ઇન્દ્રિયઘાતાન્મનોઽનવસ્થાનાત્ ।
સૌક્ષ્મ્યાદ્વ્યવધાનાત્ અભિભવાત્ સમાનાભિહારાચ્ચ ॥ ૭॥

"અતિદૂરાત્" ઇતિ અનુપલબ્ધિરિતિ વક્ષ્યમાણં સિંહાવલોકનન્યાયેનાનુષઙ્જનીયમ્ ।
યથા ઉત્પતન્ વિયતિ અતિદૂરતયા સન્નપિ પ્રત્યક્ષેણ નોપલભ્યતે ।
સામીપ્યાદિત્યત્રાપ્યતિરનુવર્તનીયઃ, યથા લોચનસ્થમઞ્જનમતિસામીપ્યાન્ન
દૃશ્યતે । ઇન્દ્રિયઘાતોઽન્ધત્વબધિરત્વાદિઃ । "મનોઽવસ્થાનાત્" યથા
કામાદ્યુપહતમનાઃ સ્ફીતાલોકમધ્યવર્તિનમિન્દ્રિયસન્નિકૃષ્ટમર્થં ન
પશ્યતિ । "સૌક્ષ્મ્યાત્" યથેન્દ્રિયસન્નિકૃષ્ટં પરમાણ્વાદિ પ્રણિહિતમના અપિ
ન પશ્યતિ । વ્યવધાનાત્- યથા કુડ્યાદિવ્યવહિતં રાજદારાદિકં ન પશ્યતિ ।
અભિભવાત્- યથાઽહનિ સૌરાભિર્ભાભિરભિભૂતં ગ્રહનક્ષત્રમણ્ડલં
ન પશ્યતિ । સમાનાભિહારાત્ - યથા તોયદવિમુક્તાનુદબિન્દૂન્ જલાશયે ન
પશ્યતિ ।

ચકારોઽનુક્તસમુચ્ચયાર્થઃ । તેનાનુદ્ભવોઽપિ સઙ્ગૃહીતઃ । તદ્યથા
ક્ષીરાદ્યવસ્થાયાં દધ્યાદ્યનુદ્ભવાન્ન પશ્યતિ ।
એતદુક્તં ભવતિ ન પ્રત્યક્ષનિવૃત્તિમાત્રાદ્વસ્ત્વભાવો ભવતિ,
અતિપ્રસઙ્ગાત્ । તથા હિ - ગૃહાદ્વિનિર્ગતો ગૃહજનમપશ્યંસ્તદભાવં
વિનિશ્ચિનુયાત્, ન ત્વેવમ્ । અપિ તુ યોગ્યપ્રત્યક્ષનિવૃત્તેરયમભાવં
વિનિશ્ચિનોતિ । ન ચ પ્રધાનપુરુષાદીનામસ્તિ પ્રત્યક્ષયોગ્યતા, ઇતિ ન
તન્નિવૃત્તિમાત્રાત્તદભાવનિશ્ચયો યુક્તઃ પ્રામાણિકાનામિતિ ।

કારિકા ૮

કતમત્પુનરેતેષુ કારણં પ્રધાનાદીનામનુપલબ્ધૌ ? ઇત્યત આહ -

॥ સૌક્ષ્મ્યાત્તદનુપલબ્ધિર્નાભાવાત્, કાર્યતસ્તદુપલબ્ધેઃ ।
મહદાદિ તચ્ચ કાર્યં પ્રકૃતિસરૂપં વિરૂપં ચ ॥ ૮॥

"સૌક્ષ્મ્યાત્" ઇતિ । અથાભાવાદેવ સપ્તમરસવદેતેષામનુપલબ્ધિઃ કસ્માન્ન
ભવતિ? ઇત્યત આહ - "નાભાવાત્" ઇતિ । કુતઃ ? "કાર્યતસ્તદુપલબ્ધેઃ",
'તત્' ઇતિ પ્રધાનં પરામૃશતિ । પુરુષોપલબ્ધૌ તુ પ્રમાણં વક્ષ્યતિ,
"સઙ્ઘાતપરાર્થત્વાત્" -(કા૦ ૧૭) ઇતિ । દૃઢતરપ્રમાણાવધારિતે
હિ પ્રત્યક્ષમપ્રવર્તમાનમયોગ્યત્વાન્ન પ્રવર્તતે ઇતિ કલ્પ્યતે ।
સપ્તમસ્તુ રસો ન પ્રમાણેનાવધારિત ઇતિ ન તત્ર પ્રત્યક્ષસ્યાયોગ્યતા
શક્યાઽધ્યવસાતુમિત્યભિપ્રાયઃ ।
કિં પુનસ્તત્કાર્યં યતઃ પ્રધાનાનુમાનમ્ ? ઇત્યત આહ - "મહદાદિ તચ્ચ
કાર્યમ્" ઇતિ । એતચ્ચ યથા ગમકં તથોપરિષ્ટાદુપપાદયિષ્યતે । તસ્ય
ચ કાર્યસ્ય વિવેકજ્ઞાનોપયોગિની સારૂપ્યવૈરૂપ્યે આહ - "પ્રકૃતિસરૂપં
વિરૂપં ચ" ઇતિ । એતે તૂપરિષ્ટાદ્વિભજનીયે ઇતિ ।

કારિકા ૯

કાર્યાત્ કારણમાત્રં ગમ્યતે । સન્તિ ચાત્ર વાદિનાં વિપ્રતિપત્તયઃ । તથા
હિ કેચિદાહુઃ - 'અસતઃ સત્ જાતતે' ઇતિ, 'એકસ્ય સતો વિવર્તઃ કાર્યજાતં
ન વસ્તુસત્' ઇત્યપરે, અન્યે તુ 'સતઃ અસત્ જાયતે' ઇતિ, 'સતઃ સત્ જાયતે'
ઇતિ વૃદ્ધાઃ ।
તત્ર પૂર્વસ્મિન્ કલ્પત્રયે પ્રધાનં ન સિદ્ધ્યતિ ।
સુખદુઃખમોહભેદસ્વરૂપપરિણામશબ્દાદ્યાત્મકં હિ જગત્કારણસ્ય

પ્રધાનત્વં સત્ત્વરજસ્તમઃસ્વભાવત્વમવગમયતિ ।
યદિ પુનરસતઃ સજ્જાયેત અસત્ નિરૂપાખ્યં કારણં સુખાદિરૂપશબ્દાદ્યાત્મકં
કથં સ્યાત્ ? સદસતોસ્તાદાત્મ્યાનુપપત્તેઃ ।
અથૈકરૂપસ્ય સતો વિવર્તઃ શબ્દાદિપ્રપઞ્ચઃ, તથાઽપિ સતઃ સજ્જાયત
ઇતિ ન સ્યાત્ । ન ચાસ્યાદ્વયસ્ય પ્રપઞ્ચાત્મકત્વમ્, અપિ ત્વપ્રપઞ્ચસ્ય
પ્રપઞ્ચાત્મકતયા પ્રતીતિર્ભ્રમ એવ ।
યેષામપિ કણભક્ષાક્ષચરણાદીનાં સત એવ કારણાદસતો જન્મ, તેષામપિ
સદસતોરેકત્વાનુપપત્તેર્ન કાર્યાત્મકં કારણમિતિ ન તન્મતે પ્રધાનસિદ્ધિઃ ।
અતઃ પ્રધાનસિદ્ધ્યર્થં પ્રથમં તાવત્સત્કાર્યં પ્રતિજાનીતે ।

॥ અસદકરણાદુપાદાનગ્રહણાત્ સર્વસમ્ભવાભાવાત્ ।
શક્તસ્ય શક્યકરણાત્ કારણભાવાચ્ચ સત્ કાર્યમ્ ॥ ૯॥

"અસદકરણાત્" ઇતિ । "સત્ કાર્યમ્" કારણવ્યાપારાત્ પ્રાગપીતિ શેષઃ । તથા
ચ ન સિદ્ધસાધનં નૈયાયિકતનયૈરુદ્ભાવનીયમ્ ।
યદ્યપિ બીજમૃત્પિણ્ડાદિપ્રધ્વંસાનન્તરમઙ્કુરઘટાદ્યુત્પત્તિરુપલભ્યતે,
તથાઽપિ ન પ્રધ્વંસસ્ય કારણત્વમ્, અપિ તુ ભાવસ્યૈવ
બીજાદ્યવયવસ્ય । અભાવાત્તુ ભાવોત્પત્તૌ તસ્ય સર્વત્ર સુલભત્વાત્
સર્વદા સર્વકાર્યોત્પાદપ્રસઙ્ગ ઇત્યાદિ ન્યાયવાર્તિકતાત્પર્યટીકાયામસ્માભિઃ
પ્રતિપાદિતમ્ ।
પ્રપઞ્ચપ્રત્યયશ્ચાસતિ બાધકે ન શક્યો મિથ્યેતિ વદિતુમિતિ
કણભક્ષાક્ષચારણમતમવશિષ્યતે ।
તત્રેદં પ્રતિજ્ઞાતમ્, "સત્ કાર્યમ્" ઇતિ । અત્ર હેતુમાહ "અસદકરણાત્" ઇતિ ।
અસત્ ચેત્ કારણવ્યાપારાત્ પૂર્વં કાર્યમ્, નાસ્ય સત્ત્વં કર્તું કેનાપિ શક્યમ્ ।
ન હિ નીલં શિલ્પિસહસ્રેણાપિ પીતં કર્તું શક્યતે । 'સદસત્ત્વે ઘટસ્ય
ધર્મૌ' ઇતિ ચેત્, તથાપિ અસતિ ધર્મિણિ ન તસ્ય ધર્મ ઇતિ સત્ત્વં
તદવસ્થમેવ, તથા ચ નાત્ત્વમ્ । અસમ્બદ્ધેનાતદાત્મના ચાસત્ત્વેન
કથમસન્ ઘટઃ? તસ્માત્ કારણવ્યાપારાદૂર્ધ્વમિવ તતઃ પ્રાગપિ સદેવ
કાર્યમિતિ ।
કારણાચ્ચાસ્ય સતોઽભિવ્યક્તિરેવાવશિષ્યતે । સતશ્ચાભિવ્યક્તિરુપપન્ના ।
યથા પીડનેન તિલેષુ તૈલરૂપ, અવઘાતેન ધાન્યેષુ તણ્ડુલાનામ્, દોહનેન
સૌરભેયીષુ પયસઃ । અસતઃ કરણે તુ ન નિદર્શનં કિઞ્ચિદસ્તિ ।
ન ખલ્વભિવ્યજ્યમાનં ચોત્પદ્યમાનં વા ક્વચિદસત્ દૃષ્ટમ્ ।

ઇતશ્ચ કારણવ્યાપારાત્ પ્રાક્ સદેવ કાર્યમ્- "ઉપાદાનગ્રહણાત્", ઉપાદાનાનિ-
કારણાનિ, તેષાં ગ્રહણં - કાર્યેણ સમ્બન્ધઃ । ઉપાદાનૈઃ કાર્યસ્ય
સમ્બન્ધાદિતિ યાવત્ ।
એતદુક્તં ભવતિ- કાર્યેણ સમ્બદ્ધં કારણં કાર્યસ્ય જનકમ્, સમ્બન્ધશ્ચ
કાર્યસ્યાસતો ન સમ્ભવતિ, તસ્માદિતિ ।
સ્યાદેતત્ - અસમ્બદ્ધમેવ કારણૈઃ કાર્યં કસ્માન્ન જન્યતે ? તથા
ચાસદેવોત્પસ્યેત ઇત્યત આહ - "સર્વસમ્બવાભાવાત્" ઇતિ । અસમ્બદ્ધસ્ય
જન્યત્વે અસમ્બદ્ધત્વાવિશેષેણ સર્વં કાર્યજાતં સર્વસ્માદ્ભવેત્ । ન
ચૈતદસ્તિ, તસ્માન્નાસમ્બદ્ધમસમ્બદ્ધેન જન્યતે, અપિ તુ સમ્બદ્ધં
સમ્બદ્ધેન જન્યત ઇતિ । યથાऽऽહુઃ સાંખ્યવૃદ્ધાઃ -
"અસત્ત્વે નાસ્તિ સમ્બન્ધઃ કારણૈઃ સત્ત્વસઙ્ગિભિઃ ।
અસમ્બદ્ધસ્ય ચોત્પત્તિમિચ્છતો ન વ્યવસ્થિતિઃ-" ઇતિ ।
સ્યાદેતત્- અસમ્બદ્ધમપિ સત્ તદેવ કરોતિ યત્ર યત્ કારણં શક્તં,
શક્તિશ્ચ કાર્યદર્શનાદવગમ્યતે । તેન નાવ્યવસ્થેત્યત આહ- "શક્તસ્ય
શક્યકરણાત્" ઇતિ । સા શક્તિઃ શક્તકારણાશ્રયા, સર્વત્ર વા સ્યાત્, શક્યે
એવ વા ? સર્વત્ર ચેત્, તદવસ્થૈવાવ્યવસ્થા । શક્યે ચેત્, કથમસતિ
શક્યે તત્ર ? ઇતિ વક્તવ્યમ્ । શક્તિભેદ એવ એતાદૃશો યતઃ કિઞ્ચિદેવ
કાર્યં જનયેત્ ન સર્વમિતિ ચેત્, હન્ત ભોઃ ! શક્તિવિશેષઃ કાર્યસમ્બદ્ધો
વાऽસમ્બદ્ધો વા ? સમ્બદ્ધત્વે નાસતા સમ્બન્ધ ઇતિ સત્ કાર્યમ્ । અસમ્બદ્ધત્વે
સૈવાવ્યવસ્થા, ઇતિ સુષ્ઠૂક્તં "શક્તસ્ય શક્યકરણાત્" ઇતિ ।
ઇતશ્ચ સત્ કાર્યમિત્યાહ - "કારણભાવાચ્ચ", કાર્યસ્ય કારણાત્મકત્વાત્ ।
ન હિ કારણાદ્ભિન્નં કાર્યમ્, કારણં ચ સદિતિ કથં તદભિન્નં
કાર્યમસદ્ભવેત્ ?
કાર્યસ્ય કારણાભેદસાધનાનિ ચ પ્રમાણાનિ -
(૧) ન પટસ્તન્તુભ્યો ભિદ્યતે, તન્તુધર્માત્ । ઇહ યદ્યતો ભિદ્યતે તત્
તસ્ય ધર્મો ન ભવતિ, યથા ગૌરશ્વસ્ય । ધર્મશ્ચ પટસ્તન્તૂનાં,
તસ્માન્નાર્થાન્તરમ્ ।
(૨) ઉપાદાનોપાદેયભાવાચ્ચ નાર્થાન્તરત્વં તન્તુપટયોઃ । યયોરર્થાન્તરત્વં
ન તયોરુપાદાનોપાદેયભાવઃ, યથા ઘટપટયોઃ । ઉપાદાનોપાદેયભાવશ્ચ
તન્તુપટયોઃ । તસ્માન્નાર્થાન્તરત્વમ્ ।
(3) ઇતશ્ચ નાર્થાન્તરત્વં તન્તુપટયોઃ, સંયોગાપ્રાપ્ત્યભાવાત્ । અર્થાન્તરત્વે

હિ સંયોગો દૃષ્ટો યથા કુણ્ડબદરયોઃ, અપ્રાપ્તિર્વા યથા હિમવદ્વિન્ધ્યયોઃ ।
ન ચેહ સંયોગાપ્રાપ્તી, તસ્માન્નાર્થાન્તરત્વમિતિ ।
(૪) ઇતશ્ચ પટસ્તન્તુભ્યો ન ભિદ્યતે, ગુરુત્વાન્તરકાર્યાગ્રહણાત્ ।
ઇહ યદ્યસ્માદ્ભિન્નમ્, તસ્માત્ તસ્ય ગુરુત્વાન્તરં
કાર્યં ગૃહ્યતે, યથૈકપલિકસ્ય સ્વસ્તિકસ્ય યો
ગુરુત્વકાર્યોઽવનતિવિશેષસ્તસ્માદ્દ્વિપલિકસ્ય સ્વસ્તિકસ્ય
ગુરુત્વકાર્યોઽવનતિભેદોઽધિકઃ । ન ચ તથા તન્તુગુરુત્વકાર્યાત્
પટગુરુત્વકાર્યાન્તરં દૃશ્યતે । તસ્માદભિન્નસ્તન્તુભ્યઃ પટ ઇતિ ।
તાન્યેતાન્યભેદસાધનાન્યવીતાનિ ।
એવમભેદે સિદ્ધે, તન્તવ એવ તેન સંસ્થાનભેદેન પરિણતાઃ પટઃ, ન
તન્તુભ્યોઽર્થાન્તરં પટઃ ।
સ્વાત્મનિ ક્રિયાનિરોધબુદ્ધિવ્યપદેશાર્થક્રિયાભેદાશ્ચ
નૈકાન્તિકં ભેદં સાધયિતુમર્હન્તિ । એકસ્મિન્નપિ
તત્તદ્વિશેષાવિર્ભાવતિરોભાવાભ્યામેતેષામવિરોધાત્ । યથા હિ કૂર્મસ્યાઙ્ગાનિ
કૂર્મશરીરે નિવિશમાનાનિ તિરોભવન્તિ, નિઃસરન્તિ ચાવિર્ભવન્તિ, ન તુ
કૂર્મતસ્તદઙ્ગાન્યુત્પદ્યન્તે પ્રધ્વંસન્તે વા । એવમેકસ્યા મૃદઃ સુવર્ણસ્ય
વા ઘટમુકુટાદયો વિશેષા નિઃસરન્ત આવિર્ભવન્ત ઉત્પદ્યન્ત ઇત્યુચ્યન્તે,
નિવિશમાનાસ્તિરોભવન્તિ વિનશ્યન્તીત્યુચ્યન્તે । ન પુનરસતામુત્પાદઃ સતાં
વા નિરોધઃ । યથાઽઽહ ભગવાન્ કૃષ્ણદ્વૈપાયનઃ -
"નાસતો વિદ્યતે ભાવો નાભાવો વિદ્યતે સતઃ" (ગીતા ૨-૧૬ ઇતિ) ।
યથા કૂર્મઃ સ્વાવયવેભ્યઃ સઙ્કોચવિકાસિભ્યો ન ભિન્નઃ, એવં
ઘટમુકુટાદયોઽપિ મૃત્સુવર્ણાદિભ્યો ન ભિન્નાઃ ।
એવઞ્ચ 'ઇહ તન્તુષુ પટઃ' ઇતિ વ્યપદેશો યથા 'ઇહ વને તિલકાઃ'
ઇત્યુપપન્નઃ ।
ન ચાર્થક્રિયાભેદોઽપિ ભેદમાપાદયતિ, એકસ્યાપિ નાનાર્થક્રિયાદર્શનાત્ ।
યથૈક એવ વહ્નિર્દાહકઃ પાચકઃ પ્રકાશકશ્ચેતિ । નાપ્યર્થક્રિયાવ્યવસ્થા
વસ્તુભેદે હેતુઃ, તેષામેવ સમસ્તવ્યસ્તાનામર્થક્રિયાવ્યવસ્થાદર્શનાત્ ।
યથા પ્રત્યેકં વિષ્ટયો વર્ત્મદર્શનલક્ષણામર્થક્રિયાં કુર્વન્તિ, ન
તુ શિબિકાવહનમ્, મિલિતાસ્તુ શિબિકામુદ્વહન્તિ, એવં તન્તવઃ પ્રત્યેકં
પ્રાવરણમકુર્વાણા અપિ મિલિતા આવિર્ભૂતપટભાવાઃ પ્રાવરિષ્યન્તિ ।
સ્યાદેતત્ - આવિર્ભાવઃ પટસ્ય કારણવ્યાપારાત્ પ્રાક્ સન્ અસન્ વા ? અસંશ્ચેત્
પ્રાપ્તં તર્હ્યસદુત્પાદનમ્ । અથ સન્, કૃતં તર્હિ કારણવ્યાપારેણ ।

ન હિ સતિ કાર્યે કારણવ્યાપારપ્રયોજનં પશ્યામઃ । આવિર્ભાવે
ચાવિર્ભાવાન્તરકલ્પનેઽનવસ્થાપ્રસઙ્ગઃ । તસ્માદાવિર્ભૂતપટભાવાસ્તન્તવઃ
ક્રિયન્ત ઇતિ રિક્તં વચઃ ।
મૈવમ્ । અથાસદુત્પદ્યત ઇતિ મતે કેયમસદુત્પત્તિઃ ? સતી, અસતી વા ? સતી
ચેત્, કૃતં તર્હિ કારણૈઃ । અસતી ચેત્, તસ્યા અપ્યુત્પત્ત્યન્તરમિત્યનવસ્થા
।
અથ- ઉત્પત્તિઃ પટાન્નાર્થાન્તરમ્, અપિ તુ પટ એવાસૌ, તથાપિ યાવદુક્તં
ભવતિ 'પટઃ' ઇતિ, તાવદુક્તં ભવતિ 'ઉત્પદ્યતે' ઇતિ । તતશ્ચ 'પટઃ'
ઇત્યુક્તે 'ઉત્પદ્યતે' ઇતિ ન વાચ્યમ્, પૌનરુક્ત્યાત્, 'વિનશ્યતિ' ઇત્યપિ ન
વાચ્યમ્, ઉત્પત્તિવિનાશયોર્યુગપદેકત્ર વિરોધાત્ ।
તસ્માદિયં પટોત્પત્તિઃ સ્વકારણસમવાયો વા, સ્વસત્તાસમવાયો વા
? ઉભયથાઽપિ નોત્પદ્યતે, અથ ચ તદર્થાનિ કારણાનિ વ્યાપાર્યન્તે ।
એવં સત એવ પટાદેરાવિર્ભાવાય કારણાપેક્ષેત્યુપપન્નમ્ ।
ન ચ પટરૂપેણ કારણાનાં સમ્બન્ધઃ, તદ્રૂપસ્યાક્રિયાત્વાત્,
ક્રિયાસમ્બન્ધિત્વાચ્ચ કારકાણામ્, અન્યથા કારણત્વાભાવાત્ ।
તસ્માત્ સત્ કાર્યમિતિ પુષ્કલમ્ ।

કારિકા ૧૦

તદેવં પ્રધાનસાધનાનુગુણં સત્કાર્યમુપપાદ્ય યાદૃશં તત્
પ્રધાનં સાધનીયં તાદૃશમાદર્શયિતું વિવેકજ્ઞાનોપયોગિની
વ્યક્તાવ્યક્તસારૂપ્યવૈરૂપ્યે તાવદાહ -

॥ હેતુમદનિત્યમવ્યાપિ સક્રિયમનેકમાશ્રિતં લિઙ્ગમ્ ।
સાવયવં પરતન્ત્રં વ્યક્તં, વિપરીતમવ્યક્તમ્ ॥ ૧૦॥

"હેતુમત્" ઇતિ । વ્યક્તં હેતુમત્, હેતુઃ કારણમ્, તદ્વત્, યસ્ય ચ યો
હેતુસ્તમુપરિષ્ટાદ્વક્ષ્યતિ ।
"અનિત્યમ્" વિનાશિ, તિરોભાવીતિ યાવત્ ।
"અવ્યાપિ" સર્વં પરિણામિનં ન વ્યાપ્નોતિ । કારણેન હિ કાર્યમાવિષ્ટમ્, ન
કાર્યેણ કારણમ્ । ન ચ બુદ્ધ્યાદયઃ પ્રધાનં વેવિષતીત્યવ્યાપકાઃ ।
"સક્રિયમ્" પરિસ્પન્દવત્ । તથા હિ બુદ્ધ્યાદયઃ ઉપાત્તમુપાત્તં દેહં ત્યજન્તિ,
દેહાન્તરં ચોપાદદતે, ઇતિ તેષાં પરિસ્પન્દઃ । શરીરપૃથિવ્યાદીનાં ચ
પરિસ્પન્દઃ પ્રસિદ્ધ એવ ।

"અનેકમ્" પ્રતિપુરુષં બુદ્ધ્યાદીનાં ભેદાત્ । પૃથિવ્યાદ્યપિ શરીરઘટાદિભેદેનાનેકમેવ ।
"આશ્રિતમ્" સ્વકારણમાશ્રિતમ્ । બુદ્ધ્યાદિકાર્યાણામભેદેઽપિ કથઞ્ચિદ્ભેદવિવક્ષયાઽઽશ્રયાશ્રયિભાવઃ, યથા 'ઇહ વને તિલકાઃ' ઇત્યુક્તમ્ ।
"લિઙ્ગમ્" પ્રધાનસ્ય । યથા ચૈતે બુદ્ધ્યાદયઃ પ્રધાનસ્ય લિઙ્ગમ્, તથોપરિષ્ટાદ્વક્ષ્યતિ । પ્રધાનં તુ ન પ્રધાનસ્ય લિઙ્ગં પુરુષસ્ય લિઙ્ગં ભવદપીતિ ભાવઃ ।
"સાવયવમ્" અવયનમવયવઃ, અવયવાનામવયવિનાં મિથઃ સંશ્લેષો મિશ્રણં સંયોગ ઇતિ યાવત્ । અપ્રાપ્તિપૂર્વિકા પ્રાપ્તિઃ સંયોગઃ । તેન સહ વર્તત ઇતિ સાવયવમ્ ।
તથા હિ- પૃથિવ્યાદયઃ પરસ્પરં સંયુજ્યન્તે, એવમન્યેઽપિ, ન તુ પ્રધાનસ્ય બુદ્ધ્યાદિભિઃ સંયોગઃ, તાદાત્મ્યાત્ । નાપિ સત્ત્વરજસ્તમસાં પરસ્પરં સંયોગઃ, અપ્રાપ્તેરભાવાત્ ।
"પરતન્ત્રમ્" બુદ્ધ્યાદિ । બુદ્ધ્યા સ્વકાર્યેઽહઙ્કારે જનયિતવ્યે પ્રકૃત્યાપૂરોઽપેક્ષ્યતે, અન્યથા ક્ષીણા સતી નાલમહઙ્કારં જનયિતુમિતિ સ્થિતિઃ । એવમહઙ્કારાદિભિરપિ સ્વકાર્યજનને ઇતિ સર્વં સ્વકાર્યેષુ પ્રકૃત્યાઽઽપૂરમપેક્ષતે । તેન પરાં પ્રકૃતિમપેક્ષમાણં કારણમપિ સ્વકાર્યજનને પરતન્ત્રં વ્યક્તમ્ ।
"વિપરીતમવ્યક્તમ્" વ્યક્તાત્ । અહેતુમત્, નિત્યં, વ્યાપિ, નિષ્ક્રિયમ્, યદ્યપ્યવ્યક્તસ્યાસ્તિ પરિણામલક્ષણા ક્રિયા, તથાઽપિ પરિસ્પન્દો નાસ્તિ । એકમ્, અનાશ્રિતમ્, અલિઙ્ગમ્, અનવયવમ્, સ્વતન્ત્રમ્, અવ્યક્તમ્ ।

કારિકા ૧૧

તદનેન પ્રબન્ધેન વ્યક્તાવ્યક્તયોર્વૈધર્મ્યમુક્તમ્ । સમ્પ્રતિ તયોઃ સાધર્મ્યમ્, પુરુષાચ્ચ વૈધર્મ્યમાહ -

॥ ત્રિગુણમવિવેકિ વિષયઃ સામાન્યમચેતનં પ્રસવધર્મિ ।
વ્યક્તં તથા પ્રધાનમ્, તદ્વિપરીતસ્તથા ચ પુમાન્ ॥ ૧૧॥

"ત્રિગુણમ્" ઇતિ । ત્રયો ગુણાઃ સુખદુઃખમોહા અસ્યેતિ ત્રિગુણમ્ । તદનેન સુખાદીનામાત્મગુણત્વં પરાભિમતમપાકૃતમ્ ।
"અવિવેકિ" । યથા પ્રધાનં ન સ્વતો વિવિચ્યતે, એવમ્મહદાદયોઽપિ ન

પ્રધાનાદ્વિવિચ્યન્તે, તદાત્મકત્વાત્ । અથ વા સમ્ભૂયકારિતાઽત્રાવિવેકિતા ।
ન હિ કિઞ્ચિદેકં પર્યાપ્તં સ્વકાર્યે, અપિ તુ સમ્ભૂય । તત્ર નૈકસ્માત્
યસ્ય કસ્યચિત્ કેનચિત્સમ્ભવ ઇતિ ॥

યે ત્વાહુઃ - 'વિજ્ઞાનમેવ હર્ષવિષાદમોહશબ્દાદ્યાત્મકમ્, ન
પુનરિતોઽન્યસ્તદ્ધર્મા' ઇતિ- તાન્ પ્રત્યાહ - "વિષય" ઇતિ । 'વિષયો'
ગ્રાહ્યઃ, વિજ્ઞાનાદ્બહિરિતિ યાવત્ ।
અત એવ "સામાન્યમ્" સાધારણમ્, ઘટાદિવત્ । અનેકૈઃ પુરુષૈર્ગૃહીતમિત્યર્થઃ ।
વિજ્ઞાનાકારત્વે તુ અસાધારણ્યાદ્વિજ્ઞાનાનાં વૃત્તિરૂપાણાં,
તેઽપ્યસાધારણાઃ સ્યુઃ, વિજ્ઞાનં યથા પરેણ ન ગૃહ્યતે,
પરબુદ્ધેરપ્રત્યક્ષત્વાદિત્યભિપ્રાયઃ । તથા ચ નર્તકીભ્રૂલતાભઙ્ગે
એકસ્મિન્ બહૂનાં પ્રતિસન્ધાનં યુક્તમ્ । અન્યથા તન્ન સ્યાદિતિ ભાવઃ ।
"અચેતનમ્" । સર્વે એવ પ્રધાનબુદ્ધ્યાદયોઽચેતનાઃ, ન તુ વૈનાશિકવત્ -
ચૈતન્યં બુદ્ધેરિત્યર્થઃ ।
"પ્રસવધર્મિ" - પ્રસવરૂપો ધર્મો યઃ સોઽસ્યાઽસ્તીતિ પ્રસવધર્મિ ।
પ્રસવધર્મેતિ વક્તવ્યે મત્વર્થીયઃ પ્રસવધર્મસ્ય નિત્યયોગમાખ્યાતુમ્ ।
સરૂપવિરૂપપરિણામાભ્યાં ન કદાચિદપિ વિયુજ્યતે ઇત્યર્થઃ ।
વ્યક્તવૃત્તમવ્યક્તેઽતિદિશતિ - "તથા પ્રધાનમ્" ઇતિ । યથા વ્યક્તં
તથાઽવ્યક્તમિત્યર્થઃ ।
તાભ્યાં વૈધર્મ્યં પુરુષસ્યાહ - "તદ્વિપરીતઃ પુમાન્" ઇતિ ।
સ્યાદેતત્- અહેતુમત્ત્વનિત્યત્વાદિ પ્રધાનસાધર્મ્યમસ્તિ પુરુષસ્ય,
એવમનેકત્વં વ્યક્તસાધર્મ્યમ્, તત્કથમુચ્યતે 'તદ્વિપરીતઃ પુમાન્' ઇતિ
? અત આહ - "તથા ચ" ઇતિ । ચકારોઽપ્યર્થઃ । યદ્યપ્યહેતુમત્ત્વાદિકં
સાધર્મ્યમ્, તથાઽપ્યત્રૈગુણ્યાદિવૈપરીત્યમસ્ત્યેવેત્યર્થઃ ।

કારિકા ૧૨

ત્રિગુણમિત્યુક્તમ્, તત્ર કે તે ત્રયો ગુણાઃ ? કિં ચ તલ્લક્ષણમ્ ? ઇત્યત
આહ -

॥ પ્રીત્યપ્રીતિવિષાદાત્મકાઃ પ્રકાશપ્રવૃત્તિનિયમાર્થાઃ ।
અન્યોન્યાભિભવાશ્રયજનનમિથુનવૃત્તયશ્ચ ગુણાઃ ॥ ૧૨ ॥

"ગુણાઃ" ઇતિ પરાર્થાઃ । "સત્ત્વં લઘુ પ્રકાશકમ્" ઇત્યત્ર ચ સત્ત્વાદયઃ
ક્રમેણ નિર્દેક્ષ્યન્તે । તદનાગતાવેક્ષણેન તન્ત્રયુક્ત્યા વા પ્રીત્યાદીનાં

યથાસઙ્ખ્યં વેદિતવ્યમ્ ।

એતદુક્તં ભવતિ - પ્રીતિઃ સુખમ્, પ્રીત્યાત્મકઃ સત્ત્વગુણઃ । અપ્રીતિઃ દુઃખમ્, અપ્રીત્યાત્મકો રજોગુણઃ । વિષાદઃ મોહઃ, વિષાદાત્મકસ્તમોગુણ ઇત્યર્થઃ ।

યે તુ મન્યન્તે" ન પ્રીતિર્દુઃખાભાવાદતિરિચ્યતે, એવં દુઃખમપિ ન પ્રીત્યભાવાદન્યદિતિ, તાન્ પ્રતિ "આત્મ"ગ્રહણમ્ ।

નેતરેતરાભાવાઃ સુખાદયઃ, અપિ તુ ભાવાઃ, આત્મશબ્દસ્ય ભાવવચનત્વાત્, પ્રીતિરાત્માભાવો યેષાં તે પ્રીત્યાત્માનઃ । એવમન્યદપિ વ્યાખ્યેયમ્ ।

ભાવરૂપતા ચૈષામનુભવસિદ્ધા । પરસ્પરાભાવાત્મકત્વે તુ પરસ્પરાશ્રયાપત્તેરેકસ્યાપ્યસિદ્ધેરુભયાસિદ્ધિરિતિ ભાવઃ ।

સ્વરૂપમેષામુક્ત્વા પ્રયોજનમાહ - "પ્રકાશપ્રવૃત્તિનિયમાર્થાઃ" ઇતિ ।

અત્રાપિ યથાસઙ્ખ્યમેવ । રજઃ પ્રવર્તકત્વાત્ સર્વત્ર લઘુ સત્ત્વં પ્રવર્તયેત્, યદિ તમસા ગુરુણા ન નિયમ્યેત, તમોનિયતં તુ ક્વચિદેવ પ્રવર્તતીતિ ભવતિ તમો નિયમાર્થમ્ ।

પ્રયોજનમુક્ત્વા ક્રિયામાહ- "અન્યોન્યાભિભવાશ્રયજનનમિથુનવૃત્તયશ્ચ" ઇતિ । વૃત્તિઃ - ક્રિયા, સા ચ પ્રત્યેકમભિસમ્બધ્યતે ।

"અન્યોન્યાભિભવવૃત્તયઃ" એષામન્યતમેનાર્થવશાદુદ્ભૂતેનાન્યદભિભૂયતે । તથા હિ- સત્ત્વં રજસ્તમસી અભિભૂય શાન્તામાત્મનો વૃત્તિં પ્રતિલભતે, એવં રજઃ સત્ત્વતમસી અભિભૂય ઘોરામ્, એવં તમઃ સત્ત્વરજસી અભિભૂય મૂઢામિતિ ।

"અન્યોન્યાશ્રયવૃત્તયઃ" । યદ્યપ્યાધારાધેયભાવેન નાયમર્થો ઘટતે, તથાऽપિ યદપેક્ષયા યસ્ય ક્રિયા સ તસ્યાશ્રયઃ ।

તથા હિ- સત્ત્વં પ્રવૃત્તિનિયમાવાશ્રિત્ય રજસ્તમસોઃ પ્રકાશેનોપકરોતિ, રજઃ પ્રકાશનિયમાવાશ્રિત્ય પ્રવૃત્ત્યા ઇતરયોઃ, તમઃ પ્રકાશપ્રવૃત્તી આશ્રિત્ય નિયમેનેતરયોરિતિ ।

"અન્યોન્યજનનવૃત્તયઃ" । અન્યતમોऽન્યતમં જનયતિ । જનનં ચ પરિણામઃ, સ ચ ગુણાનાં સદૃશરૂપઃ । અત એવ ન હેતુમત્ત્વમ્, તત્ત્વાન્તરસ્ય હેતોરભાવાત્ । નાપ્યનિત્યત્વમ્, તત્ત્વાન્તરે લયાભાવાત્ ।

"અન્યોન્યમિથુનવૃત્તયઃ" । અન્યોન્યસહચરાઃ અવિનાભાવવૃત્તય ઇતિ યાવત્ ।

"ચ"ઃ સમુચ્ચયે । ભવતિ ચાત્રાગમઃ -

"અન્યોન્યમિથુનાઃ સર્વે સર્વે સર્વત્ર ગામિનઃ ।
રજસો મિથુનં સત્ત્વં સત્ત્વસ્ય મિથુનં રજઃ ॥

તમસશ્ચાપિ મિથુને તે સત્ત્વરજસી ઉભે ।
ઉભયોઃ સત્ત્વરજસોર્મિથુનં તમ ઉચ્યતે ॥

નૈષામાદિઃ સમ્પ્રયોગો વિયોગો વોપલભ્યતે" ઇતિ (દે। ભા। ૩/૮) ।

કારિકા ૧૩

"પ્રકાશપ્રવૃત્તિનિયમાર્થાઃ" ઇત્યુક્તમ્, તત્ર કે તે ઇત્થમ્ભૂતાઃ
કુતશ્ચેત્યત આહ -

॥ સત્ત્વં લઘુ પ્રકાશકમિષ્ટમુપષ્ટમ્ભકં ચલં ચ રજઃ ।
ગુરુ વરણકમેવ તમઃ, પ્રદીપવચ્ચાર્થતો વૃત્તિઃ ॥ ૧૩ ॥

"સત્ત્વમ્" ઇતિ । સત્ત્વમેવ લઘુ પ્રકાશકમિષ્ટં સાઙ્ખ્યાચાર્યૈઃ । તત્ર
કાર્યોદ્ગમને હેતુર્ધર્મો લાઘવં ગૌરવપ્રતિદ્વન્દ્વિ, યતોઽગ્નેરૂર્ધ્વજ્વલનં
ભવતિ । તદેવ લાઘવં કસ્યચિત્તિર્યગ્ગમને હેતુર્ભવતિ, યથા વાયોઃ ।
એવં કરણાનાં વૃત્તિપટુત્વહેતુર્લાઘવમ્, ગુરુત્વે હિ મન્દાનિ સ્યુરિતિ
સત્ત્વસ્ય પ્રકાશાત્મકત્વમુક્તમ્ ।
સત્ત્વતમસી સ્વયમક્રિયતયા સ્વકાર્યપ્રવૃત્તિં પ્રત્યવસીદન્તી
રજસોપષ્ટભ્યેતે- અવસાદાત્ પ્રચ્યાવ્ય સ્વકાર્યે ઉત્સાહં પ્રયત્નં કાર્યેતે ।
તદિદમુક્તમ્- "ઉપષ્ટમ્ભકમ્" ઇતિ । કસ્માદિત્યત ઉક્તમ્ - "ચલમ્" ઇતિ ।
તદનેન રજસઃ પ્રવૃત્ત્યર્થત્વં દર્શિતમ્ ।
રજસ્તુ ચલતયા પરિતસ્ત્રૈગુણ્યં ચાલયત્ ગુરુણાऽऽવૃણ્વતા ચ તમસા
તત્ર તત્ર પ્રવૃત્તિપ્રતિબન્ધકેન ક્વચિદેવ પ્રવર્ત્યત ઇતિ તતસ્તતો
વ્યાવૃત્ત્યા તમો નિયામકમુક્તમ્- "ગુરુ વરણકમેવ તમઃ" ઇતિ । એવકારઃ
પ્રત્યેકં ભિન્નક્રમઃ સમ્બધ્યતે, સત્ત્વમેવ, રજ એવ, તમ એવેતિ ।
નનુ એતે પરસ્પરવિરોધશીલા ગુણાઃ સુન્દોપસુન્દવત્ પરસ્પરં
ધ્વંસન્ત ઇત્યેવ યુક્તં પ્રાગેવ તેષામેકક્રિયાકર્તૃતાયા ઇત્યત
આહ- "પ્રદીપવચ્ચાર્થતો વૃત્તિઃ" ઇતિ । દૃષ્ટમેતત્, યથા
વર્તિતૈલેઽનલવિરોધિની, અથ મિલિતે સહાનલેન રૂપપ્રકાશલક્ષણં
કાર્યં કુરુતઃ । યથા ચ વાતપિત્તશ્લેષ્માણઃ પરસ્પરવિરોધિનઃ
શરીરધારણલક્ષણકાર્યકારિણઃ । એવં સત્ત્વરજસ્તમાંસિ મિથો
વિરુદ્ધ્યાન્યપ્યનુવર્ત્સ્યન્તિ સ્વકાર્યં કરિષ્યન્તિ ચ ।
"અર્થતઃ" ઇતિ । પુરુષાર્થત ઇતિ યાવત્, યથા ચ વક્ષ્યતિ-
"પુરુષાર્થ એવ હેતુર્ન કેનચિત્ કાર્યતે કરણમ્" ઇતિ (કા૦ ૩૧)

અત્ર ચ સુખદુઃખમોહાઃ પરસ્પરવિરોધિનઃ સ્વસ્વાનુરૂપાણિ સુખદુઃખમોહાત્મકાન્યેવ નિમિત્તાનિ કલ્પયન્તિ । તેષાં ચ પરસ્પરમભિભાવ્યાભિભાવકભાવાન્નાનાત્વમ્ ।
તદ્યથા - એકૈવ સ્ત્રી રૂપયૌવનકુલશીલસમ્પન્ના સ્વામિનં સુખાકરોતિ । તત્કસ્ય હેતોઃ ? સ્વામિનં પ્રતિ તસ્યાઃ સુખરૂપસમુદ્ભવાત્ । સૈવ સ્ત્રી સપત્નીર્દુઃખાકરોતિ, તત્ કસ્ય હેતોઃ ? તાઃ પ્રતિ તસ્યા દુઃખરૂપસમુદ્ભવાત્ । એવં પુરુષાન્તરં તામવિન્દમાનં સૈવ મોહયતિ, તત્ કસ્ય હેતોઃ ? તત્ પ્રતિ તસ્યા મોહરૂપસમુદ્ભવાત્ । અનયા ચ સ્ત્રિયા સર્વે ભાવા વ્યાખ્યાતાઃ । તત્ર યત્ સુખહેતુઃ તત્ સુખાત્મકં સત્ત્વમ્, યત્ દુઃખહેતુસ્તત્ દુઃખાત્મકં રજઃ, યન્મોહહેતુસ્તન્મોહાત્મકં તમઃ । સુખપ્રકાશલાઘવાનાં ત્વેકસ્મિન્ યુગપદુદ્ભૂતાવવિરોધઃ, સહદર્શનાત્ । તસ્માત્ સુખદુઃખમોહૈરિવ વિરોધિભિઃ અવિરોધિભિરેકૈકગુણવૃત્તિભિઃ સુખપ્રકાશલાઘવૈર્ન નિમિત્તભેદા ઉન્નીયન્તે । એવં દુઃખોપષ્ટમ્ભકત્વપ્રવર્તકત્વૈઃ, એવં મોહગુરુત્વાવરણૈઃ - ઇતિ સિદ્ધં ત્રૈગુણ્યમિતિ ।

કારિકા ૧૪

સ્યાદેતત્ - અનુભૂયમાનેષુ પૃથિવ્યાદિષ્વનુભવસિદ્ધા ભવન્ત્યવિવેકિત્વાદયઃ । યે પુનઃ સત્ત્વાદયો નાન્યુભવપથમધિરોહન્તિ, તેષાં કુતસ્ત્યમવિવેકિત્વં વિષયત્વમચેતનત્વં પ્રસવધર્મિત્વં ચ ? ઇત્યત આહ -

॥ અવિવેક્યાદેઃ સિદ્ધિસ્ત્રૈગુણ્યાતદ્વિપર્યયાભાવાત્ ।
કારણગુણાત્મકત્વાત્કાર્યસ્યાવ્યક્તમપિ સિદ્ધમ્ ॥ ૧૪॥

"અવિવેક્યાદેઃ" ઇતિ । અવિવેકિત્વમવિવેકિ । યથા 'દ્વ્યેકયોર્દ્વિવચનૈકવચને' (પા। સૂ। ૧।૪।૨૨) ઇત્યત્ર દ્વિત્વૈકત્વયોરિતિ, અન્યથા દ્વ્યેકેષ્વિતિ સ્યાત્ । કુતઃ પુનરવિવેકિત્વાદેઃ સિદ્ધિરિત્યત્ર આહ - "ત્રૈગુણ્યાત્" ઇતિ । "યદ્યત્ સુખદુઃખમોહાત્મકં તત્તદવિવેકિત્વાદિયોગિ, યથેદમનુભૂયમાનં વ્યક્તમ્" ઇતિ સ્ફુટત્વાદન્વયો નોક્તઃ ।
વ્યતિરેકમાહ - "તદ્વિપર્યયાભાવાત્" ઇતિ । અવિવેક્યાદિવિપર્યયે પુરુષે ત્રૈગુણ્યાભાવાત્ ।
અથ વા વ્યક્તાવ્યક્તે પક્ષીકૃત્યાન્વયાભાવેનાવીત એવ હેતુસ્ત્રૈગુણ્યાદિતિ વક્તવ્યઃ ।

સ્યાદેતત્ - અવ્યક્તસિદ્ધૌ સત્યાં તસ્યાવિવેકિત્વાદયો ધર્માઃ સિધ્યન્તિ, અવ્યક્તમેવ ત્વદ્યાપિ ન સિધ્યતિ, તત્કથમવિવેકિત્વાદિસિદ્ધિરત આહ-

"કારણગુણાત્મકત્વાત્" ઇતિ ।

અયમભિસન્ધિઃ- કાર્યં હિ કારણગુણાત્મકં દૃષ્ટમ્, યથા તન્ત્વાદિગુણાત્મકં પટાદિ । તથા મહદાદિલક્ષણેનાપિ કાર્યેણ સુખદુઃખમોહરૂપેણ સ્વકારણં સુખદુઃખમોહાત્મકં પ્રધાનમવ્યક્તં સિદ્ધં ભવતિ ।

કારિકા ૧૫-૧૬

સ્યાદેતત્ - 'વ્યક્તાત્ વ્યક્તમુત્પદ્યતે' ઇતિ કણભક્ષાક્ષચરણતનયાઃ । પરમાણવો હિ વ્યક્તાઃ, તેભ્યો દ્વ્યણુકાદિક્રમેણ પૃથિવ્યાદિલક્ષણં કાર્યં વ્યક્તમારભ્યતે । પૃથિવ્યાદિષુ ચ કારણગુણક્રમેણ રૂપાદ્યુત્પત્તિઃ । તસ્માત્ વ્યક્તાત્ વ્યક્તસ્ય તદ્ગુણસ્ય ચોત્પત્તેઃ કૃતમદૃષ્ટચરેણાવ્યક્તેનેત્યત આહ -

॥ ભેદાનાં પરિમાણાત્ સમન્વયાત્ શક્તિતઃ પ્રવૃત્તેશ્ચ ।
કારણકાર્યવિભાગાદવિભાગાદ્વૈશ્વરૂપ્યસ્ય ॥ ૧૫॥

॥ કારણમસ્ત્યવ્યક્તમ્, પ્રવર્તતે ત્રિગુણતઃ સમુદયાચ્ચ ।
પરિણામતઃ સલિલવત્ પ્રતિપ્રતિગુણાશ્રયવિશેષાત્ ॥ ૧૬॥

"ભેદાનામ્" ઇતિ । ભેદાનાં - વિશેષાણાં મહદાદીનાં ભૂમ્યન્તાનાં કાર્યાણાં કારણં- મૂલકારણમસ્ત્યવ્યક્તમ્ । કુતઃ ? "કારણકાર્યવિભાગાદવિભાગાદ્વૈશ્વરૂપ્યસ્ય" । કારણે સત્ કાર્યમિતિ સ્થિતમ્ । તથા ચ યથા કૂર્મશરીરે સન્ત્યેવાઙ્ગાનિ નિઃસરન્તિ વિભજ્યન્તે- 'ઇદં કૂર્મશરીરં, એતાન્યેતસ્યાઙ્ગાનિ'- ઇતિ । એવં નિવિશમાનાનિ તસ્મિન્ અવ્યક્તીભવન્તિ । એવં કારણામૃત્પિણ્ડાદ્ધેમપિણ્ડાદ્વા કાર્યાણિ ઘટમુકુટાદીનિ સન્ત્યેવાવિર્ભવન્તિ વિભજ્યન્તે । સન્ત્યેવ પૃથિવ્યાદીનિ કારણાત્તન્માત્રાદાવિર્ભવન્તિ વિભજ્યન્તે, સન્ત્યેવ ચ તન્માત્રાણ્યહઙ્કારાત્ કારણાત્, સન્ત્યેવાહઙ્કારઃ કારણાન્મહતઃ, સન્નેવ ચ મહાન્ પરમાવ્યક્તાત્ । સોઽયં કારણાત્ પરમાવ્યક્તાત્ સાક્ષાત્ પારમ્પર્યેણાન્વિતસ્ય વિશ્વસ્ય કાર્યસ્ય વિભાગઃ ।

પ્રતિસર્ગે તુ મૃત્પિણ્ડં સુવર્ણપિણ્ડં વા ઘટમુકુટાદયો વિશન્તોઽવ્યક્તીભવન્તિ । તત્કારણરૂપમેવાનભિવ્યક્તં

કાર્યમપેક્ષ્યાવ્યક્તં ભવતિ । એવં પૃથિવ્યાદયસ્તન્માત્રાણિ વિશન્તઃ સ્વાપેક્ષયા તન્માત્રાણ્યવ્યક્તયન્તિ । એવં તન્માત્રાણ્યહઙ્કારં વિશન્ત્યહઙ્કારમવ્યક્તયન્તિ, એવમહઙ્કારો મહાન્તમાવિશન્ મહાન્તમવ્યક્તયતિ, મહાન્ પ્રકૃતિં સ્વકારણં વિશન્ પ્રકૃતિમવ્યક્તયતિ । પ્રકૃતેસ્તુ ન ક્વચિન્નિવેશ ઇતિ સા સર્વકાર્યાણામવ્યક્તમેવ । સોઽયમવિભાગઃ પ્રકૃતૌ વૈશ્વરૂપ્યસ્ય - નાનારૂપસ્ય કાર્યસ્ય, સ્વાર્થિકઃ ષ્યઞ્, તસ્માત્ કારણે કાર્યસ્ય સત એવ વિભાગાવિભાગાભ્યામવ્યક્તં કારણમસ્તિ ।

ઇતશ્ચાવ્યક્તમસ્તીત્યત આહ - "શક્તિતઃ પ્રવૃત્તેશ્ચ" ઇતિ । કારણશક્તિતઃ કાર્યં પ્રવર્તત ઇતિ સિદ્ધમ્, અશક્તાત્ કારણાત્ કાર્યસ્યાનુપપત્તેઃ, શક્તિશ્ચ કારણગતો ન કાર્યસ્યાવ્યક્તત્વાદન્યા । ન હિ સત્કાર્યપક્ષે કાર્યસ્યાવ્યાવ્યક્તતાયા અન્યસ્યાં શક્તૌ પ્રમાણમસ્તિ, અયમેવ હિ સિકતાભ્યસ્તિલાનાં તૈલોપાદાનાનાં ભેદો યદેતેષ્વેવે તૈલમસ્ત્યનાગતાવસ્થં ન સિકતાસ્વિતિ ।

સ્યાદેતત્ - શક્તિતઃ પ્રવૃત્તિઃ કારણકાર્યવિભાગાવિભાગૌ ચ મહત એવ પરમાવ્યક્તત્વં સાધયિષ્યતઃ, કૃતં તતઃ પરેણાવ્યક્તેનેત્યત આહ - "પરિમાણાત્" ઇતિ । પરિમિતત્વાત્, અવ્યાપિત્વાદિતિ યાવત્ । વિવાદાધ્યાસિતા મહદાદિભેદા અવ્યક્તકારણવન્તઃ, પરિમિતત્વાત્, ઘટાદિવત્ । ઘટાદયો હિ પરિમિતાઃ મૃદાદ્યવ્યક્તકારણકા દૃષ્ટાઃ । ઉક્તમેતદ્યથા કાર્યસ્યાવ્યક્તાવસ્થા કારણમેવેતિ, યન્મહતઃ કારણં યત્ પરમાવ્યક્તમ્, તતઃ પરતરાવ્યક્તકલ્પનાયાં પ્રમાણાભાવાત્ ।

ઇતશ્ચ વિવાદાધ્યાસિતા ભેદાઃ અવ્યક્તકારણવન્તઃ, "સમન્વયાત્" । ભિન્નાનાં સમાનરૂપતા સમન્વયઃ । સુખદુઃખમોહસમન્વિતા હિ બુદ્ધ્યાદયોઽધ્યવસાયાદિલક્ષણાઃ પ્રતીયન્તે । યાનિ ચ યદ્રૂપસમનુગતાનિ, તાનિ તત્સ્વભાવાવ્યક્તકારણાનિ, યથા મૃદ્ધેમપિણ્ડસમનુગતા ઘટમુકુટાદયો મૃદ્ધેમપિણ્ડાવ્યક્તકારણકા ઇતિ કારણમસ્ત્યવ્યક્તં ભેદાનામિતિ સિદ્ધમ્ ।

અવ્યક્તં સાધયિત્વા અસ્ય પ્રવૃત્તિપ્રકારમાહ - "પ્રવર્તને ત્રિગુણતઃ" ઇતિ । પ્રતિસર્ગાવસ્થાયાં સત્ત્વં રજસ્તમશ્ચ સદૃશપરિણામાનિ ભવન્તિ । પરિણામસ્વભાવા હિ ગુણા નાપરિણમ્ય ક્ષણમપ્યવતિષ્ઠન્તે । તસ્માત્ સત્ત્વં સત્ત્વરૂપતયા, રજો રજોરૂપતયા, તમસ્તમોરૂપતયા પ્રતિસર્ગાવસ્થાયામપિ પ્રવર્તતે । તદિદમુક્તં - "ત્રિગુણતઃ" ઇતિ ।

પ્રવૃત્ત્યન્તરમાહ - "સમુદયાચ્ચ" ઇતિ । સમેત્ય ઉદયઃ - 'સમુદયઃ' સમવાયઃ । સમુદયશ્ચ ગુણાનાં ન ગુણપ્રધાનભાવમન્તરેણ સમ્ભવતિ, ન ચ ગુણપ્રધાનભાવો વૈષમ્યં વિના, ન ચ વૈષમ્યમુપમર્દોપમર્દકભાવાદૃતે, ઇતિ મહદાદિભાવેન પ્રવૃત્તિર્દ્વિતીયા ।

સ્યાદેતત્- કથમેકરૂપાણાં ગુણાનામનેકરૂપા પ્રવૃત્તિરિત્યત આહ - "પરિણામતઃ સલિલવત્" ઇતિ । યથા હિ વારિદવિમુક્તમુદકમેકરસમપિ તત્તદ્ભૂવિકારાનાસાદ્ય નારિકેલતાલતાલીબિલ્વચિરબિલ્વતિન્દુકામલકપ્રાચીનામલકકપિત્થફલરસતયા પરિણમન્મધુરામ્લલવણતિક્તકષાયકટુતયા વિકલ્પતે, એવમેકૈકગુણસમુદ્ભવાત્ પ્રધાનં ગુણમાશ્રિત્યાપ્રધાનગુણાઃ પરિણામભેદાન્ પ્રવર્તયન્તિ । તદિદમુક્તમ્- "પ્રતિપ્રતિગુણાશ્રયવિશેષાત્" । એકૈકગુણાશ્રયેણ યો વિશેષસ્તસ્માદિત્યર્થઃ ।

કારિકા ૧૬

Encoded and proofread by Dhaval Patel drdhaval2785 at gmail.com

*sA Nkhyatattvakaumudī*

pdf was typeset on November 5, 2024

Please send corrections to *sanskrit@cheerful.com*